
End :

वालस्थानं विना कुर्यान्नित्यं + + + ।
कौतुकानि न्य + + त्वा गौणमुख्यं समीक्ष्य च ॥
पूर्वं तु(?) प..लीकृत्व उक्तवत् + + + ।
× × × × × × × ॥

Colophon :

\+ + + + +

280

Sl. No. 45942 वैखानससूत्रम् Ms. No. A. 365

Beginning

विशुद्धविज्ञानघनस्वरूपं
विज्ञानविश्राणनलब्धदीक्षम् ।
दयानिधिं देहभृतां शरण्यं
देवं हयग्रीवमहं प्रपद्ये ॥

मृग्वङ्गिरो मरीच्यत्रिः पुलस्त्यः पुलहः क्रतुः ।
तथा वसिष्ठो दक्षश्च यमः स्वायम्भुवो द्विजाः ॥

अष्टादश कर्म —

अथ निषेकादिसंस्कारान् व्याख्यास्यामः

End :

सहस्रकलशस्नाने यत्फलं राजराष्ट्रयोः ।
प्रजानां तदशेषेण प्रागुक्तमिति नोच्येत ॥
× × × × × × × ।
महोत्सवफलेनैतत्किञ्चित्तुल्यफलं स्मृतम् ॥

Colophon :

इति श्रीवैखानसप्रोक्ते सुमुहूर्तार्चनाधिकरणे सहस्रकलशस्नपनविधिर्नाम नवतितमोऽध्यायः ।

281

Sl. No. 45943 वैखानससूत्रम् Ms. No. P. 610

Beginning :

द्विभुजं दक्षिणेनैव दानंजलचरं(?)भवेत् ।
पादेनोद्धृतवामेन प्रसारितकरं परम् ॥
द्विभू.... .... मि स्यात् राज्यकामी चतुर्भुजम् ।
भुजमष्टन्तु चिन्मयी सर्वकामं लभेत्सुधीः ॥
× × × × × × × × ।
प्रतिष्ठोक्तक्रमेणैव कृत्वाचैवोत्सवं चरेत् ॥

End :

बाल्ये च यदि वा वृद्धे मूढे भार्गवजीवयोः ।
मलमासादिदोषेषु वर्जयेद्देवदर्शनम् ॥

सर्वं गन्धादिनाभ्यर्च्य स्मृत्वा देवीं प्रणम्य च ।
.... त्यादाय तत्काले वाराहे मनसा स्मरेत् ॥

\+ + + + + + + ।
\+ + + + + + + ॥

Colophon :

× × × × × × × ।

282

Sl. No 45945 श्यनसूक्तहोमप्रयोगः Ms·No. P. 9019/35

Beginning :

ओम् ॥ सुपर्णोऽसि गरुत्मान् त्रिवृत्ते शिशो गायत्रञ्चक्षुस्तोम आत्मा । साम ते तनुर्वामदेव्यम् । बृहद्रथन्तरे पक्षौ यज्ञा यज्ञीयं ऽच्छं छन्दांस्यङ्गानि धिष्णीश्शफा यजूंषि नाम ।

End :

विष्णोरिदं जिष्णुमहं प्रनुमन्यताम् यत्वैष्णवं समतां समःवम् । वैष्णवेऽहं वहतां वहामि + + + स्वाहा स्वधा वै शिरसा वहामि सिन्धोः पतिं वरुणमाविदन्तु ॥ ओम् ॥

Colophon :

\+ + + + +

283

Sl. No. 45946 श्रीसूक्तहोम: Ms No. P. 9019/6

Beginning :

॥ ओं ॥ श्रियै जात: श्रिय आनिर्याय श्रियं वयो जनितृभ्यो दधातु श्रियं वसाना अमृतत्वमायन् भवन्ति सत्या सविता वितघून् स्वाहा ॥

End :

पद्मप्रिये पद्मिनि पद्महस्ते
पद्मालये पद्मदलायताक्षि ।
विश्वप्रिये विष्णुमनोनुकूले
त्वत्पादपद्मं मयि सन्निधत्स्व ॥
स्वाहा ॥

Colophon :

× × × × × ×

284

Sl. No. 45948 सर्वदैवत्यहोम: Ms. No. P. 9019/15

Beginning :

ओम् विष्णवे पुरुषाय सत्याय अच्युताय अनिरुद्धाय श्रियै द्युत्यै पवित्र्यै प्रमोदायिन्यै + + कपिलाय यज्ञाय + पुण्याय वराहाय नारसिंहाय वामनाय त्रिविक्रमाय सुभद्राय ईशितात्मने सर्वोद्वहाय सर्वविद्येश्वराय ॥

End :

ये भूता प्रचरन्ति + + वारिबलि + +च्छन्दो विदुस्तस्य प्रेष्या-स्तेभ्यो बलिं पुष्टिकामो हरामि मयि पुष्टिं पुष्टिपतिर्दधातु स्वाहा ॥

Colophon :

× × × × × × ×

285

Sl. No. 45949 सारस्वतीसूक्तहोमः Ms. No. P. 9019/14

Beginning :

सा मो अवायस्या वयं न विक्ष्महि वृक्षेन वसन्तीं यवस्स्वाहा ।
निश्शतामा सो अविक्षितः निपद्भ्ये निपक्षिगः निस्थेनचिदथिनः स्वाहा ।

End :

चोदयन्त्री सूनृतानां चेतन्ती सुमतीनां यज्ञ दधे सरस्वती स्वाहा ।
महोर्णा सरस्वती प्रचे ?)चेतुकेतुना धियो विश्वा विराजतु स्वाहा ॥

Colophon :

+ + + + + + +

286

Sl. No. 45950 स्वस्तिसूक्तहोमः Ms. No. P. 9019/27

Beginning :

॥ ओम् ॥ स्वस्ति नो समीतामश्विना भग स्वस्ति देव्यदितरनर्वणः ।
स्वस्ति पूग असुरो दधातु नस्स्वस्ति द्यावा पृथिवी सुचेतना स्वस्तये ।
वायुमुपब्रवामहे सोमं स्वस्ति भुवनस्य यशस्पतिः । बृहस्पतिं सर्वगणं
स्वस्तये ॥ — — —

End :

अदितिर्द्यौः अदितिरन्तरिक्षमदितिर्माता सविता सुपुत्रः विश्वे देवा
अदितिः पञ्चजनां अदितिर्मातामदितिर्जनित्वम् ॥

Colophon :

\+ + + + + + + +

287

Sl. No. 45351 अगस्त्यसंहिता Ms. No. P. 3 ·5/1

Beginning :

अगस्त्यो नाम देवर्षिसत्तमो गौतमीतटात् ।
कदाचिद्दण्डकारण्ये सुतीक्ष्णस्याश्रमं ययौ ॥
प्रत्युज्जगाम तं भक्त्या गन्धपुष्पाक्षतोदकैः ।
पाद्यार्घ्यार्द्यर्हणां चक्रे तस्मै ब्रह्मविदे मुनिः ॥
सुतीक्ष्णस्तु प्रणम्याथ सुखासीनं तपोनिधिम् ।
श्रीमदागमनेनैव जीवतं सफलं मम ॥
अद्य.... मुने ॥ नाद्राक्ष.... मुनिसत्तम ॥ भवाब्धे.... वद ।
इत्युक्तः .... आत्मवित् ॥ अगस्त्यः ॥
कदाचित्पार्वती प्राह भर्तारं भक्तवत्सलम् ॥

End :

न्यासात्साधनमस्त्येव×लातस्माद्धन्मतः ।
चोराव्याघ्रादिभूतानां अयमेव परायणम्॥
पराभिभूतराज्यानां धर्षितानां परै पुनः ।
सन्नाहभाजां युद्धेषु रुद्धानां परसैनिकैः ॥

यात्राकाले तु हनूमन्तं स्मरन्यस्तु स्वकाद्गृहात् ।
निर्गच्छति स वेगेन इष्टार्थमपि गच्छति ॥
स्वापकाले स्मरन्नित्यं × + दिकां जयेत् ।
× × × × × × × ॥

Colophon :

इत्यगस्त्यसंहितायां परमरहस्ये द्वात्रिंशोध्यायः ।

288

Sl. No. 45954 अग्निकार्यम् Ms. No. P. 1397/44

Beginning :

अग्निकार्यं मुनिश्रेष्ठ श्रोतुमिच्छामि तत्त्वतः ।
तत्सर्वं विस्तरेणैव वक्तुमर्हसि मेऽनघ ॥
कपिञ्जल उवाच—
× × × × × × × ।
अग्निकार्यविधिं वक्ष्ये देवदेवस्य शार्ङ्गिणः ॥

End :

एकाग्नावपि होतव्यं होमद्रव्यमशेषतः ।
त्रये चतुष्टये चैव अग्नीनां चतुरानन ॥
× × × × × × × ।
बलिप्रदानं प्रथमं प्रकुर्याद्यागमण्डपे ॥

Colophon :

इति श्रीपाञ्चरात्रे महोपनिषदि पाद्मतन्त्रे चर्यापादे अग्निमुखं नाम चतुर्थोऽध्यायः ॥

289

Sl. No. 45962 **अग्निजननविधिः** Ms. No. P. 8298/8

Beginning :

अथाग्निजननं वक्ष्ये सर्वशास्त्रानुसारतः ।
यागे कुण्डानि संस्कुर्यात् संस्कारैरेभिरेरितैः ॥
अष्टादशस्सुसंस्काराः कुण्डानां तत्र बोधितम् ।
प्रोक्षणं मूलमन्त्रेण × स्त्रेण प्रोक्षणं स्मृतम् ॥

End :

(?)एन देवाः पवित्रेणात्मानं पुनते सदा ।
तेन सहस्रधारेण पावमान्यः पुनन्तु माम् ॥
× × × × × × × ।
प्राजापत्यं पवित्रं यस्य स्मृत्या च ॥
एकत्रिदिवसे……… माचरेत् ।
नमवद्वादशि……..नवमेऽपि वा ॥

Colophon :

\+ + + + + + +

290

Sl. No. 45968 **अङ्कुरार्पणम्** Ms. No. P. 242/2A

Beginning :

प्रतिष्ठाकर्मणि पूर्वमङ्कुरार्पणमारभेत् ।
न कर्मफलदं ब्रह्मन् अङ्कुरारोपणं विना ॥

तस्मादारभ्यमाणेषु कपुणादिषु कर्मसु ।
प्रागेव वापयेत् बीजान्यङ्कुरार्थं यथाविधि ॥

\+ + + + + + +।

× × × × × × × ×॥

End :

अन्ये चतुर्मुखमुखाः आहूतव्या मरुद्गणाः ।
देवस्योत्सवसेवार्थं तथान्ये भगवद्गणाः ॥

तदान्ये भगवद्भक्ताः जनस्त्वत्पादसेवनाः ।
देवताह्वानपूर्वस्तु स्वर्गभोगफलप्रदः ॥

× × × × × × ×।
अङ्कुरार्पणपूर्वंत्तु सर्वेषां मोक्षदो भवेत् ॥

Colophon :

स्वस्तिप्रजाप्रजाभ्यः परिपालयन्तां न्यायेन मार्गेण महीं महीशाः । गोब्राह्मणेभ्यः शुभमस्तु ॥

29।

Sl. No. 45971 अङ्कुरार्पणम् Ms. No. P. 1669/12

Beginning :

अङ्कुरार्पणमथो वक्ष्ये सर्वकार्यप्रसिद्धये ।
उत्सवे स्नपने चैव प्रोक्षणे स्थापने तथा ॥

\+ + + + + + +।

भूसंग्रहादिषु सर्वेषु अङ्कुरार्पणमारभेत् ॥

End :

स्थापयेत्तोरणं तत्र पूर्वादिक्रमयोगतः ।
एवं तु कारयित्वाथ मण्डपादीन् विशेषतः ॥
+ + + + + + + ।
तद्दिने कारयेत्पश्चात् अङ्कुरार्पणमुत्तमम् ॥

Colophon :

इत्यङ्कुरार्पणम् ।

292

Sl. No. 45977 **अक्षमालाप्रतिष्ठाविधिः** **Ms. No. C. 696/27**

Beginning :

अक्षमालाप्रतिष्ठा उक्ता स्मृत्यन्तरे—

तत्र पूर्वं पुण्याहं वाचयित्वा तत्र देवस्याग्रे गोमयेनोपलिप्य रङ्गवल्या पद्मं विलिख्य तत्र चक्राब्जं विलिख्य तिलतण्डुलराशीन् प्रस्थाप्य नववस्त्रेणाच्छाद्य—

End :

समिच्चरुघृतैः प्रत्येकमष्टोत्तरशतं जुहुयात् ।
अक्षमालां ततः शुद्धां सालिग्रामे समर्पितम् ॥
अष्टाक्षरादिमन्त्रैस्तु मन्त्रितां गुरुहस्ततः ।
गृहीत्वा कुङ्कुमालां तां प्रणम्य जपमाचरेत् ॥

Colophon :

इति मालाप्रतिष्ठाविधिः समाप्ता ।

293

Sl. No. 45978 अदीक्षितबिम्बस्पर्शनिषेधनिर्णयः Ms. No. P. 10281/73

Beginning :

अदीक्षितबिम्बस्पर्शनवर्जनम् —

श्रीयादीनां च देवीनां मालयाश्रयवर्तिन × × ।
विष्वक्सेनगरुत्मादीन् शठकोपादिकान्यपि ॥

अर्हणादिषु सर्वेषु दीक्षितैरेव कारयेत् ।
अदीक्षितनरो मोहाद्भुक्त्यर्थं चार्चयेद्यदि ॥

\+ + + + + + ++ ।
\+ + + + + + + ॥

End :

षण्मासात्पतनं याति सोऽक्षयं नरकं व्रजेत् ।
श्रियादीनां च भक्तानां दीक्षितैरेवमर्चनात् ॥

अन्यथाविपरीतश्चेत्के ...चुन्निदेवराट् ।
तद्ग्रामवासिनः सर्वे महाव्याध्यादिपीडनम् ॥

तत्स्थानं नाशयेत्पूर्वं राजा च सह सन्ततिः ।
तस्मात्सर्वप्रयत्नेन दीक्षितैरेवमर्चयेत् ॥

× × × × × × × ।
× × × × × × × ॥

Colophon :

इति नलकूबरसंहितायाम् ।

294

Sl. No. 45981 **अद्भुत-दहनप्रायश्चित्तम्** Ms. No. P. 4907/23

Beginning :

रोदनं स्वेदकं बिम्बे संभवे यदि देशिकः ।
अट्टहासो द्रवःलिलं रुधिरं कम्पनं तथा ॥
× × × × × × × × ।
अङ्गभङ्गो भवेत्तस्मिन् वल्मीकस्य समुद्भवे ॥

End :

प्रदक्षिणं प्रणामं तु कृत्वा तत्रैव देशिकः ।
ब्राह्मणानामनुज्ञां च वाचयेत् क्रमयोगतः ॥

Colophon :

इति श्रीपाञ्चरात्रे परमसंहितायां अद्भुतदहनप्रायश्चित्तपटलः ।

295

Sl. No. 45982 **अधिकमासनिर्णयः** Ms. No. P. 5253/124-J

Beginning :

देवोत्सवे जयन्त्यां च पवित्रारोपणे तथा ।
आब्दिके दर्शपूर्णे च भुक्तौ सीमन्तकर्मणि ॥
मासदोषो यदि भवेत् न दोषाय कदाचन ।
देवोत्सवेषु सर्वेषु पवित्रारोपणादिषु ॥

End :

शुक्राद्यस्तमयं विष्णोः पवित्राद्युत्सवेषु च ।
विघ्नोऽपि न भवत्येव सर्वेष्वेतेषु च प्रभोः ॥
गुरुभार्गवमौढ्ये तु अधिमासादिदोषके ।
नोपक्रमेदुत्सवं तु द्वितीयादौ न दोषकृत् ॥

Colophon :

इति नारायणसंहितायां अधिकमासनिर्णयः ।

296

Sl. No 45983 **अधिकमासनिर्णयः** Ms. No. P. 5253/124

Beginning :

देवोत्सवे जयन्त्यां च पवित्रारोपणे तथा ।
अब्दिके दर्शपूर्णे च भुक्तौ सीमन्तकर्मणि ॥
मासदोषो यदि भवेत् न दोषाय कदाचन ।
उत्सवं चोक्तमासे च कारयेद्देशिकोत्तमः ॥

End :

उत्सवादौ तु दोषः स्यात् प्रथमं कल्पनं यदि ।
द्वितीयादौ न दोषः स्यात् कारयेद्विप्रसत्तम ॥
× × × × × × चास्तं गते सति ।
नोत्सवः प्रथमः कल्प्यः कल्पने राजराष्ट्रयोः ।
प्रजानां चैव दुःखः स्यात् व्याधिर्वा मृत्युरेव वा
× × × × × × × × × नम् ॥

Colophon :

इति श्रीपाद्मसंहितायां अधिकमासनिर्णयः ।

297

Sl. No. 45998 **अध्ययनोत्सवविधिः** Ms. No. P. 5253/95

Beginning :

मार्गशीर्षकमासे तु सितपक्षे विशेषत ।
असितेवोभयत्रापि वित्तस्यैवानुरूपतः ॥

एकादश्यां महायागः स्नपनाद्यं महाहविः ।
निवेद्यं देवदेवाय भक्ष्यभोज्यान्यनेकशः ॥

× × × × × × × ।
× × × × × × × ॥

End :

पारणं यः प्रकुर्वीत दीक्षितैर्वैष्णवैस्सह ।
स भवेत् भक्तिमान् विष्णौ तथैकान्तिकमाप्नुयात् ॥

कैवल्यं चाप्नुयात् पश्चात् नात्रकार्या विचारणा ।
अणिमादिगुणान् वापि कांक्षितानैहिकांस्तथा ॥

+ + + + + + + ।
+ + + + + + + ॥

Colophon :

इति नारदीयसंहितायां अध्ययनोत्सवविधिः चतुर्विंशाध्याये ।

298

Sl. No. 46003 **अनन्तप्रतिष्ठा** Ms. No. P. 5635/16

Beginning :

अनन्तप्रतिष्ठापनप्रयोगः—

मार्गशीर्षे शुक्लपक्षे पञ्चम्यामेकाध्वरविधानेन अनन्तप्रीत्यर्थमनन्तप्रतिष्ठां करिष्ये इति संकल्प्य पुण्याहवाचनं कृत्वा ॥

End :

भूर्भुवस्सुवरोमिति मन्त्रप्रदक्षिणं विश्वभुजे नम आत्मने नमः इत्येतैर्मन्त्रैश्चतुर्वारं प्रदक्षिणां ब्राह्मणांश्च भोजयेत् ॥

Colophon :

इत्यनन्तप्रतिष्ठा ।

299

Sl. No. 46014 **अमावास्यातिथिनिर्णयः** Ms. No. P. 5233/14

Beginning :

स्याद्दर्शपूर्णिमापूर्णे परेद्यश्च कलायुते ।
सम्पूर्णं वर्जयेद्विद्वान् परेद्यस्स्नपनं चरेत् ॥
अरुणोदयकाले तु कलामात्रा स्पृशेद्यदि ।
तद्दिनं तु ममंदूति ....(?) राजराष्ट्रविवृद्धये ॥

End :

उदये तु कलापूर्वं तद्दिने स्नपनं चरेत् ।
दिनद्वये च सम्प्राप्ते खण्डिते पर्वसम्भवे ॥

पूर्वेद्युर्वर्जयेद्धीमान् अन्येद्युः स्नपनं चरेत् ।
अमावास्यादिने काले प्रातः पूजां समाचरेत् ॥

Colophon :

इति श्रीवासुदेवसंहितायां एकोनपञ्चाशोऽध्याये अमावास्यातिथिनिर्णयः ।

300

Sl. No. 46016 अमावास्योत्सवविधिः Ms. No. P. 5253/149

Beginning :

अमावास्योत्सवं वक्ष्ये विष्णोर्देवस्य चक्रिणः ।
एकादश्यां दिने पूर्वं कृत्वा चैवाङ्कुरार्पणम् ॥
अधिवास्य तु युक्तेन पूर्वरात्रे महाद्युतिः ।
अग्निकार्यं क्रमात् कृत्वा समिदाज्यचरुक्रमात् ॥
× × × × × × × ।
× × × × × × × × ॥

End :

महाहविर्निवेद्यं च उपदंशसमन्वितम् ।
पायसं दापयेत् पश्चात् मुखवास्तु प्रदापयेत् ॥
स याति ब्रह्मलोकत्वं विष्णुलोके महीयते ।
इति सम्यक् समाख्यातं अमावास्योत्सवं परम् ॥
+ + + + + + + ।
+ + + + + + + ॥

Colophon :

इति श्रीकपिञ्जलसंहितायां अमावास्योत्सवविधिर्नाम द्वाविंशोऽध्यायः ।

301

Sl. No. 46027 **अवधारणविचारः** Ms. No. P. 4952/4

Beginning :

ऋग्भिर्गीयमानऋषिगणपूजित स्वामिन् ऋग्वेदमवधारय। यदुनन्दन यदुकुलभूषण यजुर्भिराराधितपाद यादवेन्द्र स्वामिन् यजुर्वेदमवधाराय।

End :

कमलासनादिकरवृन्दकल्पितकस्तूरिकातिलक स्वामिन् कहलादिवाद्यमवधारय। उपनिषदुद्यान × × लचतुरमुनिजनसन्तुष्टमानस स्वामिन् उपनिषदमवधारय।

Colophon :

\+ \+ \+ \+ \+

302

Sl. No. 46032 **अशनिपातप्रायश्चित्तम्** Ms No. P. 4984/45

Beginning :

प्रातः सन्ध्यासु वेलायां पूरयेच्छङ्खमेव तु।
तत्तत्काले च यच्छ्रुत्वा मुच्यते सर्वपातकैः॥

प्रासादे गर्भगेहे च मण्टपे शुकनासिके।
प्राकारे गोपुरे वाथ स्वपीठे बलिपीठके॥

End :

उक्तद्रव्येण मतिमान् दक्षिणां दापयेत्ततः।
ब्राह्मणान् भोजयेत्पश्चाद्यथा वित्तानुसारतः॥

एवं क्रमेण विप्रेन्द्र प्रायश्चित्तं समाचरेत् ।
अकृते फलहानिः स्यान्नाशयेत्सर्वमेव तु ॥
× × × × × × × ।
× × × × × × × ॥

Colophon :

इति श्रीपाञ्चरात्रे महोपनिषदि पौष्करसंहितायां अशनिपातप्रायश्चित्त-पटलः ।

303

Sl. No. 46034 **अशनिपातप्रायश्चित्तम्** **Ms. No P. 4907.38**

Beginning :

अथातस्संप्रवक्ष्यामि अशनिप्रोक्षणक्रमम् ।
नारदेन पुरा प्रोक्तं शास्त्रदृष्ट्या यथोदितम् ॥
× × × × × × × ।
आलये गर्भगेहे च गोपुरे मुखमण्डपे ॥
× × × × × × × × ।
× × × × × × × × ॥

End :

तद्ग्रामो यजमानश्च राजा राष्ट्रं विनश्यति ।
तस्मात्सर्वप्रयत्नेन प्रोक्षणं च समाचरेत् ॥

Colophon :

इति श्रीपाञ्चरात्रे ब्रह्मसंहितायां अशनिपातप्रोक्षणं नाम पञ्चाशोऽध्यायः ।

304

Sl. No. 46037 अश्वलक्षणविधिः Ms.No. P. 5253/145

Beginning :

रथस्य लक्षणं प्रोक्तं अश्वलक्षणमुच्यते ।
अश्वं तु द्विविधं प्रोक्तं दारुजं वेत्रजं तथा ॥
दारुजं चोत्तमं विद्यात् वेत्रजं मध्यमं भवेत् ।
औदुम्बरं च न्यग्रोधं कारयेदश्वमुत्तमम् ॥

End :

पृष्ठादिस्कन्धपर्यन्तं योजयेयुश्चतुश्चतुः ।
चतुष्पदसमायुक्तं कारयेल्लक्षणान्वितम् ॥
सितादिवर्णभेदेन रञ्जयेत् कुलशेन च ।
इदं रहस्यं परमं सर्वपापप्रणाशनम् ॥

Colophon :

इति श्रीपाञ्चरात्रे ब्रह्मसंहितायां सप्तविंशोऽध्यायः ।

305

Sl. No. 46040 अष्टबन्धनविधिः Ms.No. P. 1669/6

Beginning :

लाक्षं सज्जरसं सिक्थं कुरुविन्दं च गुग्गुलम् ।
ग्रन्थिकं गुडतैलं च अष्टबन्धनमुत्तमम् ॥

End :

तद्बिम्बार्दीश्च पात्राणि छत्रचामरपिञ्छकैः ।
यो मोहात् कुरुते तस्मिन् राजा राष्ट्रं विनश्यति ॥

Colophon :

—श्रीः —

306

Sl. No. 46041 **अष्टबन्धनसम्प्रोक्षणविधिः** **Ms. No. P. 4984/64**

Beginning :

अथातः सम्प्रवक्ष्यामि जलप्रोक्षणं परम् ।
त्रिविधं प्रोक्षणं प्रोक्तं तच्छृणुष्व महामुने ॥

आवर्तं चाप्यनावर्तं पुनरावर्तमेव च ।
आद्यं बालग्रहादेव मूलस्थाने प्रतिष्ठितम् ॥

\+ \+ \+ \+ \+ \+ \+

End :

पादोनसाधकानां च दीक्षितानां तदर्धकम् ।
अन्नदानं च सर्वेषां दद्याद्देवसमीपतः ॥

इति सम्यक् समाख्यातो जलसम्प्रोक्षणक्रमः ।
एतद्विचार्य कर्तव्यं पाञ्चरात्रविशारदैः ॥

Colophon :

इति श्रीपाञ्चरात्रे विष्णुसिद्धान्ते अष्टबन्धसम्प्रोक्षणविधिर्नाम षट्त्रिंशोऽध्यायः ।

307

Sl. No. 46043 **अष्टाक्षरन्यासविधिः** Ms.No. P. 10281/13

Beginning :

मन्त्रन्यासं ततः कुर्यान्मूलमन्त्रेण देशिकः ।
स्थितिन्यासः स्थितौ कार्यं सृष्टिन्यासस्तथासने ॥
शय्यायां संहृतिन्यासः संहारशयनं यदि ।
पर्वदक्षिणगतर्जिन्याः प्रक्रम्याङ्गुलिपर्वसु ॥
\+ \+ \+ \+ \+ \+ \+

End :

नाभ्यादि हृदयान्तेषु न्यासोऽङ्गेषु प्रकीर्तितः ।
अष्टाक्षरस्य मन्त्रस्य स्थानान्येतानि तानि च ॥
× × × × × × × ।
मूर्ध्नि मध्यमयाङ्गुल्या तर्जन्या सह चक्षुषे ॥

Colophon :

× × × × × × × ×

308

Sl. No. 46044 **अष्टाक्षरमन्त्रकल्पनविधिः** Ms. No. P. 10281/76

Beginning :

अष्टाक्षरकल्पनम् ।
प्रणवं पूर्वमुद्धृत्य भद्रपाणिसविष्णुकम् ।
वोतदेवयुतं दक्षविघ्नेशं च सगोपनम् ॥

End :

विश्वाम्नानं सादिदेनं शङ्खमादिसमन्वितम् ।
द्वितीयस्वरसंयुक्तं वनमालिं समुद्धरेत् ।
× × × × × × × × ।
एवमष्टाक्षरं मन्त्रमुद्धृतः सर्वसाधकः ॥

Colophon :

× × × × × × ×

309

Sl. No. 46046 **अष्टाक्षराब्जविचारः** Ms. No. P. 4977/67

Beginning :

चतुरश्रं तु तत्क्षेत्रं विभज्य दशधा पुनः ।
अंशकानां भवेद्विप्र शतमेकं तथा द्विज ॥
मध्ये × × गर्भिः पद्मकर्णिका केसरान्वितम् ।
पीठं प × × त्त्या बहिः कल्प्यं द्विपदं × × जयेत् ।

End :

शान्तिकर्माण्यशेषेण ग्रहरोगाद्युपद्रवे ।
पूजयेत्सदा भक्त्या ग्रहरोगाद्युपद्रवे ॥
× × × × × × × × ।
पूजयेच्च सदा भक्त्या सोऽश्वमेधफलं लभेत् ॥

Colophoh :

इति श्रीपाञ्चरात्रे वासुदेवसंहितायां अष्टाक्षराब्जं नाम एकादशोऽध्यायः ।

310

Sl. No. 46048 अहिर्बुध्न्यसंहिता Ms. No. A. 290

Beginning :

अक्षरत्रितयाव्यक्तविकाराक्षादिरूपिणे ।
परव्यूहादितत्त्वाय नमश्चक्राय चक्रिणे ॥
(नदधिष्ठितां शक्तिं नमस्कुरुते—)
सोमसूर्यानलाकल्पामकल्पामिन्दुशेखराम् ।
पञ्चबिन्दुं हरेश्शक्तिं पञ्चकृत्यकरीं नुमः ॥

End :

नमः शिवाय शान्ताय
नारदाय महर्षये ।
नमः सुदर्शनायाथ
विष्णोः सङ्कल्परूपिणे ॥

Colophon :

इति श्रीपाञ्चरात्रे तन्त्ररहस्ये अहिर्बुध्न्यसंहितायां षष्टितमोऽध्यायः ॥
॥ सम्पूर्णम् ॥

311

Sl. No. 46049 आगमप्रामाण्यम् Ms. No. C. 4689/25

Beginning :

जगज्जन्मस्थितिध्वंसमहानन्दैकहेतवे ।
करामलकवद्विश्वं पश्यते विष्णवे नमः ॥

+ + + इह केचिद्यतस्ततोपगतः पयः कुतर्कशकलविद्याचिंतमनसस्त्र-यीमार्गसंरक्षणव्याजेन निजविमर्शकौशलातिशलमुपदर्शयन्तः परमपुरुषविरचित-निरतिशयनिश्रेयसगोचरपांचरात्रप्रामाण्ये विप्रतिपद्यन्ते ।

End :

कल्पं विलसं तु सात्वतमतप्रस्पर्धिदुष्पद्धतिया–
मुग्धोर्थतदुर्विदग्धपरिषद्वैदग्ध्यविध्वंसिनः ।
श्रीमन्नाथमुनीन्द्रवर्धितधिया निर्धूतविश्वशिवा–
स्सन्तस्सन्ततगद्यपद्यपदवीहृद्यादवद्योक्तयः ॥

Colophon :

इति श्रीभगवद्यामुनमुनिरा्भिर्विरचितां श्रीपांचरात्रप्रामाण्यं सम्पूर्णम् ।

312

Sl. No. 46050 आग्रयणोत्सवविधिः Ms. No. P. 5253/51

Beginning :

तथाचाग्रयणाख्यस्य वत्सरे वत्सरे द्वयम् ।
आषाढे पूर्वफल्गुन्यां पुष्ये चैव विशेषतः ॥
माघमासे तु पञ्चम्यां
× मथवा द्विज ॥
विशेषयजनं कुर्यात्
विभवेच्छानुरूपतः ॥

End :

मुहूर्ते शोभने प्राप्ते पक्वमानं निवेशयेत् ।
आग्रयणविशेषेण अश्वमेधफलं भवेत् ॥

तस्मात् सर्वप्रयत्नेन
एतत् कर्म नियोजयेत् ।
लोपयेद्यदि मे मोहात्
धान्यनाशो भवेद्ध्रुवम् ॥

Colophon :

इति श्री अनिरुद्धसंहितायां आग्रयणोत्सवविधिः ।

313

Sl. No. 46052 आचार्यऋत्विग्वरणक्रमनिर्णयः Ms. No. P. 4977/53

Beginning :

स्थापनासु च सर्वासु क्रियासु विविधासु च ।
ऋत्विजो वरयेत्पूर्वं कङ्कणं बन्धयेत्ततः ॥

\+ + + + + + + +।
\+ + + + + + + +॥

End :

देवस्य दक्षिणे हस्ते देव्योर्वामकरे तथा ।
आचार्यः कर्मकर्तॄणां कौतुकं बन्धयेत्क्रमात् ॥

\+ + + + + + + +।
\+ + + + + + + +॥

Colophon :

इति पाञ्चरात्रे ब्रह्मसंहितायां आचार्यऋत्विग्वरणं नाम तृतीयोऽध्यायः ।

314

Sl. No. 46056 आचार्यलक्षणनिर्णयः Ms. No. P. 10281/70

Beginning :

आचार्यलक्षणम्—

आचार्यलक्षणं वक्ष्ये समासाच्छृणु सुव्रत ।
ब्राह्मणं जन्मसंशुद्धं नियतं ब्रह्मवादिनम् ॥
आत्मज्ञानपदं शान्तं नारायणपरायणम् ।
जगदुत्पत्तितत्त्वज्ञं स्थितिसंहारवेदिनम् ॥

× × × × ×

End :

युवानं कोमलं दान्तं ब्रह्मचर्याव्रते रतम् ।
येभिरेवं गुणैर्युक्तमाचार्यं वरयेत्सुधीः ॥
दीक्षितं भगवद्भक्तं समयाचारतत्परम् ।
आचार्यलक्षणं प्रोक्तं दीक्षां निगदतः शृणु ॥

Colophon :

× × × × × × × ×

315

Sl. No. 46061 आञ्जनेयप्रतिष्ठाविधिः Ms. No. P. 1397/56

Beginning :

प्राणायामत्रयं कृत्वा रेचकादिविधानतः ।
ध्यानं तु सकलीभावमायाभावमशेषतः ॥

× × × × × × × × ।

प्रोक्षयेत्कुम्भतोयेन प्रतिमां स्वेन विद्यया ॥

End :

आचार्यं पूजयेत्पश्चात् हेमवस्त्रादिभिः क्रमात् ।
इति संक्षेपतः प्रोक्तः प्रतिष्ठाविधिरुत्तमः ॥

Colophon :

इति श्रीपाञ्चरात्रे विष्णुतत्त्वे आञ्जनेयप्रतिष्ठाविधिर्नाम दशमोऽध्यायः ।

316

Sl. No 46066 **आराधनप्रायश्चित्तम्** Ms. No P. 3481/21

Beginning :

पूजायां वक्ष्यतेदानीं प्रायश्चित्तं शृणुष्व ह ।
अर्घ्यादिभोगद्रव्याणां हीने दोषं वदाम्यहम् ॥
अर्घ्यद्रव्यविहीने तु पादेचाचमनेऽपि च ।
यदि पूजाश्च कुरुते चार्घ्यहानिर्भविष्यति ॥
× × × × × × ×

End :

समाधानशतं जप्त्वा मूलमन्त्रेण देशिकः ।
मूर्तिमन्त्रेण वा कुर्यात् पञ्चोपनिषदैः क्रमात् ॥
अधमोत्तममार्गेण स्नापयेद्देशिकोत्तमः ।
नदीह्रदतटाकेभ्यस्तोयमुद्धृत्य देशिकः ॥
शुद्धाभिषेकं कृत्वाथ पूजयेत्पुरुषोत्तमम् ।
हविर्निवेदयेत्पश्चाच्चरुपुष्पेण होमयेत् ॥

आचार्यं पूजयेत्पश्चात्पञ्चविंशतिसङ्ख्यया ।
× × × × × × ×॥

Colophon :

× × × × × × × ×

317

Sl. No. 46068 आलयभङ्गप्रायश्चित्तविधिः Ms. No. P. 2151/53

Beginning :

श्रीमद्दैवतसार्वभौमगृहिणी शृङ्गारवाराब्धिविः
स्वर्णाङ्गी सुविशेषभूषणवती कञ्जातपत्रां करे ।
वामे दक्षीणलम्बहस्तजघनी पद्मप्रि ा पद्मिनी
पद्माक्षी स्मर्ण.ि्दरा जयतु मे पञ्चास्त्रमाता सती ॥
× × × × × × ×
आलये मण्टपे चैव प्राकारे गोपुरे तथा ।
गोपुराग्रे विमानादौ न्यूनाङ्गं न प्रदक्षि-म् ॥

End :

विमानं चालयं भङ्गं तद्देवं चोत्सवं कुरु ।
तदालयप्रदक्षिण्ये लब्धपुण्यं विनश्यति ॥
× × × × × × × ×।
तत्कारणोत्सवं देवं प्रदक्षिण्ये च वर्जयेत् ॥

Colophon :

× × × × × × ×

317

Sl. No. 46070 आलयान्तर्मरणप्रायश्चित्तम् Ms. No. P. 1397/17

Beginning :

प्रायश्चित्तं प्रवक्ष्यामि मरणे देवतालये ।
चण्डालपतितादीनां मरणं वर्तते यदि ॥
गर्भागारे तथा चार्धमण्डपे वा मुनीश्वर ।
महानसे तु पीठाग्रे तथाऽभ्यन्तरमण्डपे ॥

End :

तस्मात्संप्रोक्ष्य कर्तव्यं पाञ्चरात्रोक्तमार्गतः ।
न कुर्याद्यदि मूढात्मा कोशान्मूर्च्छति देवराट् ॥
× × × × × × × × ।
× × × × × × × × ॥

Colophon :

\+ + + + +

319

Sl. No. 46071 आलयार्चनानियमसंग्रहः Ms. No. P. 1397/47

Beginning :

आवाहयाम्यमरबृन्दनताङ्घ्रियुग्मं
लक्ष्मीपतिं भुवनकारणमप्रमेयम् ।
आद्यं सनातनतनुं प्रणवासनस्थं
पूर्णेन्दुभास्करहुताशसहस्ररूपम् ॥

End :

अर्चकस्य तपो योगात् पूज.याश्चातिशायनात् ।
आभिरूप्याच्च विम्बस्य सदा सन्निहितोऽस्म्यहम् ॥

Colophon :

--- श्रा: ---

320

Sl. No 46074 आशौचनिर्णयः Ms. No. P. 5253/128

Beginning :

श्रीभगवानुवाच —

अथ वक्ष्ये विशेषेण सूतकाशौचनिर्णयम् ।
तत्सर्वं विस्तरेणैव श्रूयतां कमलासन ॥

प्रतिष्ठाप्रोक्षणे चैव प्रायश्चित्तेषु सर्वशः ।
आकस्मिकोत्सवे चैव अन्येषु विविधेषु च ॥

End :

औपासनाग्निहोमं तु जपहोमार्चनादिकम् ।
यावत्कालाश्रयं प्रेतं तावत्कालं विन भवेत् ॥

एवं विचार्य कर्तव्यं पञ्चरात्रविशारदैः ।
तस्मात् सर्वप्रयत्नेन ऊक्तमार्गेण कारयेत् ॥

Colophon :

इति श्रीपाद्मसंहितायां सूतकाशौचशेषनिर्णयो नाम एकविंशोऽध्यायः

321

Sl. No. 46081 **आशौचनिर्णयः** Ms. No. P· 5253/175

Beginning :

श्रीभगवानुवाच—

आशौचसूनकाविधिं वक्ष्यामि द्विजसत्तम ।
वृद्धिक्षयावीसौतक्यां औदक्यां च त्र्यहानि च ॥
रजस्वलायाः संस्पर्शे प्रेतस्पर्शे च वा भवेत् ।
गणिकां वित्तरं प्रेतसंस्पृष्टे मम मन्दिरे ॥

End :

ध्वजारोहणमारभ्य यावत्तस्यावरोहणम् ।
यागार्थं दीक्षितस्यैव सूतकं प्रेतकं न हि ॥
भेरीताडनमारभ्य यावत्पुष्पात्रसानिकम् ।
प्रेतादिसम्भवेन्मध्ये आचार्यस्य न विद्यते ॥

Colophon :

इति श्रीपाञ्चरात्रे विष्णुतत्वसंहितायां आशौचविधिर्नाम अष्टमोऽध्यायः

322

Sl. No. 46091 **आशौचनिर्णयः** Ms. No. P. 3481/49

Beginning :

श्रीभगवानुवाच—

आशौचसूतकविधिं वक्ष्यामि द्विजसत्तम ।
वृद्धिक्षयादिसौतक्यमौदक्यां शस्त्रहानि च ॥

रजस्वलायाः संस्पर्शे च वा भवेत् ।
गणिकाभर्तरि प्रेतसंस्पृष्टे मम मन्दिरे ॥

End :

\+ + + + +

अप्यनुज्ञां गुरोस्तस्य सम्प्राप्य विधिपूर्वकम् ।
शेषं कुर्यात्तत्पुत्रः तच्छिष्यो वा समाचरेत् ॥
वंशजो वा ततो भ्राता प्रायश्चित्तं तु पूर्वकम् ।
विशेषोद्वाहकर्मान्तं उत्सवान्तं समाचरेत् ॥

Colophon :

इति पाञ्चरात्रे महोपनिषदि सात्वतसंहितायां आचार्य ऋत्विग्जनानां आशौचविधिर्नाम अष्टत्रिंशोऽध्यायः।

323

Sl. No. 46095 **इन्द्ररात्रम्** Ms. No. P. 1988/7

Beginning :

सनत्कुमारः—

मन्त्रोद्धारं प्रवक्ष्यामि यथावदनुपूर्वशः ।
स्वरास्तु प्रथमं जाताः यथावत् तान् वदामि वः ॥
अकारः प्रथम जज्ञे स्वराणामादिरव्ययः ।
इकारस्तु ततो जातः उकारोऽस्मादजायत ॥

End :

ईकारलयो यस्तु सकल्प इति संज्ञितः ।
आ अकारलयो यस्तु तत् कल्पान्तमुदाहृतम् ॥

अकारस्य लयो यस्तु तद्विष्णोः परमं पदम् ।
अतः परं न चादैवं स्थूलं वा सूक्ष्ममेव वा ॥
+ + + + + + + ।
+ + + + + + + ॥

Colophon :

इति श्रीपाञ्चरात्रमहासंहितायां सनत्कुमारप्रोक्तायां इन्द्ररात्रे मन्त्रोद्धारक्रमो-
नाम द्वितीयोऽध्यायः ॥

324

Sl. No. 46097 ईशानचूर्णिका Ms. No. P. 1669/25

Beginning :

नमो ईशानदेवाय
स्तुत्यायाखिलदैवतैः ।
करुणारसपूर्णाय
गिरिजापतये सदा ॥
श्रीमत्कमलासनपाकशासनादिमुनिवरकोटिकिरीटसंपुटित—

End :

भुजगपतिधरं षार्वतीशं नमामि—
शंकराभरणरागम् । पार्वतीलोचनताळम् । अर्धचन्द्रहस्तम् ।
भृङ्गिनाट्यम् । समरेखम् । भार्गवमण्डलम् । पञ्चमहावाचम् ।

Colophon :

+ + + + +

325

Sl No. 46098 **ईश्वरतन्त्रव्याख्या** Ms No. P. 5272/3

(सात्वतार्थप्रकाशिकाव्याख्या)

Beginning :

श्रीमद्यादवशैलाग्रशेखरं सद्गुणाकरम् ।
योगानन्दनृसिंहाख्यदैवतं पर्युपास्महे ॥

\+ + + + +

आनन्दमयमध्यस्थमंजगेहाधिदैवतम् ।
श्रीमत्सात्वततन्त्राच्र्यं यदुशैलाधिपं भजे ॥

\+ + + + +

सुस्पष्टमेतत्तन्त्रार्थाविशदास्सातामृते ।
तानेवात्राम्रेडयामोऽद्य गीर्भिर्व्याख्यानरीतिभिः ।

\+ + + + +

ब्रह्मणमीश्वराख्य तन्त्रमुपदिदिक्षुः तदवतारक्रमं दर्शय नारायणेति ।

End :

इति पद्मकुण्डलक्षणम् । अथ वृत्तचतुरश्र × × लक्षणमुच्यते । पूर्वो × ष्टादशधा विभक्ते क्षेत्रे मध्ये पूर्वावत् चतुष्षष्टिकोष्ठानि खातार्थं विहाय तद्वहिरेकया पङ्क्त्या योनिकल्पनं चतुर्थिः पाङ्क्तिभिखलाचतुष्टयकल्पनं कुर्यात् । किंतु खानं मेखलाश्च वृत्ते कुण्डे वृत्ताकारश्चतुरश्रे तदाकार इति ज्ञेयम्)

शालिवाहशकाब्दानां षट्पञ्चाशत्समुत्तरे
स सप्तशतसाहस्रे गते मन्मथवत्सरे ।
वृश्चिकाब्नुष; स्थानं श्वो गमिष्यति भास्करे
कृष्णाष्टम्यां भानुवारे दिवा प्रथमयामतः ॥
योगानन्दनृसिंहस्य कृपा पूर्णकटाक्षतः
संपूर्णेयं खलु व्याख्या सात्वतार्थप्रकाशिका ॥

Colophon :

इति श्रीमत्सांख्यायनकुलतिलकस्य भ॰वच्छास्त्रपारीणस्य यदुगिरिचरणकमलार्चकस्य श्रीयोगानन्दभट्टाचार्यस्य तनयेन श्रीयदुगिरिनायक्यम्मण्यम्बागर्भसम्भवेन नारायणसंयमीश्वरकटाक्षभिवृद्धबोधेन सरसकविशार्दूलेन यदुकुलपय.पारावारपूर्णचन्द्रश्रीकृष्णराजसार्वभौमसभामध्यसम्प्राप्तश्वेतच्छात्रोभयचामरान्दोलिकामुक्तासरमणिकुण्डलहेमो॰वीत.विद्वद्रलयाद्यनेक.बिरुदावळिना अळहशिङ्गभट्टेन विरचितायां सात्वतार्थप्रकाशिकाव्याख्यायां ईश्वरतन्त्रव्याख्यायां पञ्चविंशोऽध्यायः ।

326

Sl. No. 46101 ईश्वरसंहिता Ms. No. P. 3681

Beginning :

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
× × × × × × × ।
× × × × × × × ॥
नमः सकलकल्याणदायिने चक्रपाणये ।
विषयार्णवमग्नानां समुद्धरणहेतवे ॥
+ + + + +

End :

शास्त्रार्थश्चानुवक्तव्यो मन्त्रार्थैश्च समन्वितम् ।
एतच्छास्त्रोक्तविधिना योऽर्चयत्यच्युतं प्रभुम् ॥
सोऽचिराल्लभते स्वष्टान् सर्वार्थांश्च द्विजोत्तमाः ।
× × × × × × × ॥

Colophon :

इति श्रीपाञ्चरात्रे ईश्वरसंहितायां कुण्डस्रुक्स्रुवलक्षणऽहविःपाकविधानं नाम पञ्चविंशोऽध्यायः ।

327

Sl. No. 46102 उडुपोत्सवविधानम् Ms. No P. 5253/35

Beginning .

तन्मासे तु विशेषेण विशेषोत्सवमाचरेत् ।
शिबिकाकुञ्जरं वापि उडुपं तु तथाचरेत् ।

श्रीभगवानुवाच—

उडुपोत्सवविधिर्ह्येष समासान्मुनिपुङ्गवः ।
सहस्त्वभूतहितार्थाय सर्वसम्पत्सुखावहम् ॥

\+ + + + + + + ।
\+ + + + + + + + ॥

End :

हिरण्यं दशनिष्कं च आचार्याय प्रदापयेत् ।
तदर्धमृत्विजानां च तदर्धं परिवारकान् ॥
सेवाजनमनुष्याणां दक्षिणां दापयेत् सुधोः ।
कीलादि दशनिष्काणि दद्याद्देवस्य सन्निधौ ॥

olophon :

इति श्रीहिरण्यगर्भसंहितायां उडुपोत्सवविधानं नाम द्वात्रिंशोऽध्यायः

328

Sl. No. 46105 **उत्थापनोत्सवविधिः** Ms. No. P. 5253/55

Beginning :

कार्तिके मासि संप्राप्ते द्वादश्यां चासितेतरे ।
पक्षे प्रबोधयेद्देवं अर्चयित्वा यथावसु ॥

मन्त्रश्चोदुत्यमित्येषः उत्तिष्ठति प्रबोधने ।
प्रबोध्यवार्चयेद्देव उत्थितं विधिवर्त्मना ॥

End :

द्वारतोरणकुम्भादि यजनं च यथा पुरम् ।
ग्रामे महोत्सवः कार्यः सर्वमङ्गलसंयुतः ॥

सर्वे चाश्रमिणः कुर्युः व्रतानां च विसर्जनम् ।
दशनिष्कं तदर्धं वा दक्षिणां गुरवे ददेत्(?) ॥

× × × × × × × ।
× × × × × × × ॥

Colophon :

इति श्रीपाञ्चरात्रे चर्यापादे पञ्चदशाध्याये उत्थापनविधिः ॥

329

Sl. No. 46109 **उत्पातशान्तिविधिः** Ms. No P. 4984/21

Beginning :

मार्कण्डेयसंहितायां—भूकम्पप्रोक्षणम् ।
अथातः सम्प्रवक्ष्यामि भूकम्पप्रोक्षणं शृणु ।

देवालये तटाके च ग्राममध्ये तथैव च ॥
षोडशस्तम्भसंयुक्तं द्वात्रिंशत्स्तम्भमेव वा ।
× × × × × × ×

End :

प्रणम्य शिरसा देवं पुण्डरीकाक्षविद्यया ।
पूजास्वीकरणार्थाय क्षमस्व पुरुषोत्तम ॥
इति मन्त्रं जपित्वा तु आशीर्वादमतः परम् ।
कारयेद्देशिकेन्द्रस्तु राष्ट्रशान्तिर्न संशयः ॥

Colophon :

इति पाञ्चरात्रे महोपनिषदि मार्कण्डेयसंहितायां उत्पातशान्तिविधिर्नाम एकोनत्रिंशोऽध्यायः ।

330

Sl. No. 46110 **उत्सवकालनिर्णयः** **Ms. No. P. 5253/8**

Beginning:

वेलापुरीनिलयकेशवपादपद्म—
सेवारतंसकलसद्गुणवारिराशिम् ।
भक्तन्त्वनन्तशयनाख्यगुरोस्तनूजं
लक्ष्मणार्यगुरुवर्यमहं भजामि ॥
कुम्भस्य परितश्चाष्टौ कलशान् विन्यसेत्ततः ।
इन्द्रादीशानपर्यन्तं देवीनां च क्रमान्न्यसेत् ॥

End :

इति वृद्धपाञ्चे—

निशि वा दिवि वा चापि सङ्क्रान्तिर्वर्तते यदि ।
निधायानुपरं ग्राह्यं दिवा चेत् पूर्ववंद शुभम् ॥

अर्धरात्रमतिक्रम्य सङ्क्रामे समुपस्थिते ।
उदये स्नानकार्याणि कृत्वा चोत्सवमाचरेत्

Colophon :

हरिः ओम्

331

Sl. No. 46113 उत्सवनाडिकाभेदविधिः Ms No. P. 5253/120

Beginning :

अथातः संप्रवक्ष्यामि नाडिकाभेदमुत्तमम् ।
महोत्सवेषु सर्वेषु पवित्रादि विशेषतः ॥

मासपक्षनिधिं चैव नाडिकाभेदमुच्यते ।
देवतावाहनं कुर्यात् पूर्वाह्णेषु समाचरेत् ॥

End :

दक्षिणां दापयेत्तस्य आचार्याऋत्विजस्सह ।
आचार्यदक्षिणहिने तत्सर्वं निष्फलं भवेत् ।

अन्यथा लोपमाप्नोति कर्ता भर्ता विनश्यति ।
तस्मात् सर्वप्रयत्नेन उत्सवं च समाचरेत् ॥

Colophon :

इति श्रीनारदीयसंहितायां उत्सवनाडिकाभेदविधिर्नाम अष्टादशोऽध्यायः ।

332

Sl. No. 46117 उत्सवनिर्णयः Ms No. P. 1669/81

Beginning :

कोटिग्रामेषु विप्राणां तटाकं शतकोपमम् ।
पञ्चकोटिस्तु यज्ञानां प्रतिष्ठाशब्दमात्रकम् ॥
+ + + + +
तद्वैष्णवस्य यो देवः प्रतिष्ठोत्सवमाचरेत् ।
पारंपर्येण यच्छास्त्रं उत्सवाद्यादिपूजनम् ॥
× × × × × × × ।
× × × × × × × ।

End :

सप्तमं दीप्तमेवं तु अष्टमं षट्कोणकं तथा ।
नवमं नवविधानं नैव नवाऽऽसनविधिक्रमात् ॥
× × × × × × ।
व्याघ्रकृष्णाजिनं चैव कूर्मं चासनमेव च ॥
× × × × × × × ।
× × × × × × × ॥

Colophon :

+ + + + +

333

Sl. No. 46125 **उत्सवप्रायश्चित्तम्** Ms. No. P. 4984/44

Beginning :

अथातः सम्प्रवक्ष्यामि प्रायश्चित्तं महर्द्धिदम् ।
वर्तमानार्चने ग्रामे नगरे पत्तनादिषु ॥
महोत्सवपावित्रादि वर्तने विष्णुमन्दिरे ।
उत्सवभ्रमणे काले रथ्या वीथ्यादिषु द्विज ॥
\+ \+ \+ \+ \+

End :

आचार्यं पूजयेत्पश्चाद्वस्त्रहेमाङ्गुलीयकैः ।
दक्षिणां दापयेत्पश्चा यथातुष्टोभवेत्तथा ॥
अत्रोपयुक्त यद्द्रव्यमाचार्याय प्रदापयेत् ।
महताविभवेनैत्र अध्वशेषं परिभ्रमेत् ॥

Colophon :

इति पञ्चरात्रे पौष्करसंहितायामुत्सवप्रकरणे वर्षबिन्दुपतनप्रायश्चित्तं नाम चतुश्चत्वारिंशोऽध्यायः ।

334

Sl. No. 46136 **उत्सवविचारः** Ms. No. P. 4977/29

Beginning :

उत्सवे देवदेवेशं सदा सर्वत्र पूजयेत् ।
वस्त्रपुष्पादिकैर्भोगैर्यथा × × ते दिङ्मुखम् ॥

आसने वा स्थितो वापि साधकस्तु यथारुचि ।
एवं तु भ्रमणं कुर्यात् एकाहाद्यूत्सवेऽष्वपि ॥

End :

तस्मिन् प्रधाननक्षत्रे पत्रपुष्पफलान्विते ।
पञ्चविंशतिकुम्भांस्तु स्थापयित्वाभिषेचयेत् ॥
इति पारमेश्वरे उत्सवाध्याये ।

Colophon :

\+ + + + + + + +

335

Sl. No. 46138 उत्सवविधिः Ms. No. P. 5253/99

Beginning :

शाण्डिल्यः—

अथोत्सवविधानं तु वक्ष्यामि श्रृणु सत्तम ।
उत्सवारम्भदिवसात् पूर्वस्मिन् पञ्चमेऽहनि ॥
अङ्कुरारोपणं कुर्यात् पूर्वोक्तविधिना ततः ।
पूर्ववद्यागसदनं कल्पयित्वा विभूषयेत् ॥

End :

आचार्यास्साधकां वापि कुर्वीरन्नेव तत्सर्वम् ।
आचार्यास्तेषुसोष्णीषाः भवेयुस्सोत्तरीयकाः ॥
अकञ्चुकाः सदाविप्राः साधकास्युस्सकञ्चुकाः ।
सकञ्चुकायद्याचार्याः तत्पूजानिष्फलाभवेत् ॥

Colophon :

इति श्रीपारमेश्वरक्रियाकाण्डे सप्तदशाध्याये महोत्सवविधिः ।

336

Sl No. 4 147 उत्सवाङ्गनिर्णयः Ms. No. P. 10281/60

Beginning :

उत्सवाङ्गम् ।

अथोत्सवस्य चाङ्गानि लक्षणं वक्ष्यतेऽधुना ।
प्रथमस्तु ध्वजारोहः गणाह्वानं द्वितीयकम् ॥

आधिवासस्तृतीयं तु यागार्थं मुनिपुङ्गव ।
चतुर्थं स्नपनं ज्ञेयं पञ्चमं मङ्गलाङ्कुरम् ॥

End :

अपराह्ने तु सम्प्राप्ते प्रायाश्चित्तं समाचरेत् ।
स्नपनं शान्तिहोमं च भोजयेद्वेदपारगान् ॥

दक्षिणां दापयेत्तस्य आचार्यो ऋत्विजैः सह ।
आचार्यदक्षिणाहीने तत्सर्वं निष्फलं भवेत् ॥

अन्यथा लोपमाप्नोति कर्ता भर्ता विनश्यति ।
तस्मात्सर्वप्रयत्नेन उत्सवं च समाचरेत् ॥

\+ + + + + + + ।
\+ + + + + + + ॥

Colophon :

इति नारदीयसंहितायां अष्टादशोऽध्यायः

337

Sl No. 46150 उद्वासनदिव्यप्रबन्धः Ms. No. P. 4895/5

Beginning :

ज्योतिश्चक्रधरं सरत्नकटकं कल्याणपीताम्बरं
भूम्यालिङ्गितमाश्रयं सुमनसां स्थित्योपसर्वोत्करम् ॥
भास्वत्पादजुषां दिशन्तमनिसं सारूप्यमत्युज्वलं
श्रीमदज्ञानजनाश्रयेश्वविभुं मेरुं परं मन्महे ॥

\+ + + + + + +

ओं सत्यज्ञानमनन्तं ब्रह्म नारायणपरं ब्रह्म + + + + पुरुषशब्द-वाच्चराय् त्रिप.द्विभूतिलेवैकुण्ठेतु + + सह दन्न अनन्तगरुडविश्वक्सेनादि-हलाय् इरुन्दुल्ल ।

End :

वृषभवाहनारोहणराय् उमादेवियोडु त्रिशूलकपालहस्तनाय् तन्नुडय प्रमथगणंमलोत्तुसेविचु × × नायिट्टे ।

Colophon :

× × × × × × ×

338

Sl. No. 46152 उपचारविधिः Ms No. P. 1397/14

Beginning :

अतः परं प्रवक्ष्यामि अर्चनाविधिमुत्तमन् ।
आवाहनं तु पूर्वं स्यात् आसनं पाद्यमेव च ॥
× × × × × × × ×
अर्घ्यमाचमनीयं च स्नानं वस्त्रोपवीतकम् ।

End :

एवं कृत्वा तु विधिवत् विष्णुप्रियकरं भवेत् ।
एतदुद्देशतः प्रोक्तः उपचारादिकाः क्रियाः ॥

.... ।
अक्षरद्वयसंयुक्तं वस्त्रनाभविदं स्मृतम् ॥

Colophon :

इति विष्णुसिद्धान्ते उपचारविधिष्षोडशोऽध्यायः ।

339

Sl. No. 46153 **उपचारविहीनफलनिर्णयः** Ms. No. P. 10281/47

Beginning :

उपचारविहीनफलम् ।

ब्रह्मोवाच—

नवार्चनस्य देवेश साङ्गोपाङ्गविहीनकम् ।
यदर्चन कृतं यत्र सर्वेषां विफलप्रदम् ॥

विष्णुरुवाच—

ममार्चने चतुर्वक्त्र भोगहीनफलं शृणु ।
ममार्चन विधौ ब्रह्मन् राजाराष्ट्रं विनश्यति ॥

\+ + + + +

End :

नमस्कारविहीने तु पङ्गुत्वमभिजायते ।
प्रदक्षिणविहीने तु पापरोगविवर्धनम् ॥
कलशस्नानहीने च सर्वक्षोभं तु भूपतेः ।
नीराजनविहीने तु मन्दबुद्धिः प्रजायते ॥

Colophon :

— — — — —

340

Sl. No. 46157 **उल्कापातगोपुरारोहणादिपतनप्रायश्चित्तम्** Ms. No. P. 3481/7

Beginning :

तथैवाशनिपाते तु उल्कापाते तथा निशि ।
तेनैव मरणे जाते ग्रामशान्तिपुरस्सरम् ॥
सद्यः सम्प्रोक्षणं कृत्वा पश्चात्सर्वं समाचरेत् ।
वापीकूपादिषु ब्रह्मन् पतनान्मरणे सति

End :

पश्वादीनां च मर्त्यानां विसृजेत्तज्जलं बहिः ।
अर्धं वा तु तदर्धं वा षडंशं वाष्टमांशकम् ॥
समुद्धृत्य जलं चाद्यं प्रोक्षयेत्पञ्चगव्यकैः ।
सम्प्रोक्षणं तथा कुर्याद्यथा शास्त्रोक्तवर्त्मना ॥
+ + + + + + +
अकृते सति सम्मोहाद्राजा राष्ट्रं च नश्यति ।
द्विजानां भोजनं चैव सर्वदोषप्रशान्तये ॥

Colophon :

× × × × × ×

341

Sl. No. 46159 **ऊर्ध्वपुण्ड्रमाहात्म्यम्** Ms. No. P. 1669/90

Beginning :

ऊर्ध्वपुण्ड्रस्य माहात्म्यं वक्ष्यामि शुभदर्शना ।
धारणं देवमुच्छेदभवबन्धविमोचकः ॥

एकान्तिनो महाभागाः सर्वभूतहितेरताः ।
सान्तरालान् प्रकुर्वीत पुण्ड्रान् हरिपदाकृतीन् ॥

End :

एकादश्यां विष्णुपत्नी
द्वादश्यां सुरसुन्दरी ।
तत्प्रक्षाळनतोयेषु
मूर्घ्निलक्ष्मीस्तथैव च ॥

Colophon :

इति श्रीपाञ्चरात्रे विष्णुसंहितायां परमरहस्ये ऊर्ध्वपुण्ड्रविधानं नाम द्वादशोऽध्यायः ॥

342

Sl No. 45161 ऋषिरात्र्‌ Ms. No. P. 5032/4

Beginning :

सनत्कुमारः—

ऋषिरात्रं प्रवक्ष्यामि यथाहुः ऋषयः पुरा ।
पञ्चकालान्यथावत्कथयाम्यनुपूर्वशः ॥
यत्र विष्णुं समुद्दिश्य क्रियते कर्म दीक्षितैः ।
तत्सर्वं कारसम्बद्धं ततोऽन्यत्तु न विद्यते ॥

End :

तस्मात्सर्वप्रयत्नेन व्रतानान्न × × क्षयेत् ।
ऋषिरात्रमिति प्रोक्तं बार्हस्पत्यमनन्तरम् ॥

Colophon :

इति श्रीपाञ्चरात्रे वैष्णवसिद्धान्ते महासंहितायां दशसहस्रिकायां सनत्कुमारप्रोक्तायां ऋषिरात्रे शस्त्रलक्षणं नाम दशमोऽध्यायः ।

343

Sl. No. 46166 एकादश्यर्चनाविधिः Ms. No. P. 3481/38

Beginning :

एकादश्यां सिते पक्षे उपोष्य विधिपूर्वकम् ।
द्वादश्यां योर्चयेद्विष्णुं तस्य पुण्यफलं श्रृणु ॥
+ + + + + + ++ ।
+ + + + + + + ॥
सर्वपापैर्विनिर्मुक्तः सर्वरोगैस्सुदारुणैः ।
इह लोके परान् भोगान् विपुलानपि तान् सुखम् ॥
+ + + + +

End :

विष्णुलोकं समाप्नोति वैष्णवश्च भविष्यति ।
यः कुर्यान्मासि मास्येवं तस्य पुण्यफलं श्रृणु ॥
चिन्तयेन्मनसा यद्यत्तत्सम्प्राप्नुयान्नरः ।
अणिमादिगुणान् भुक्त्वा पश्चात्कैवल्यभाग्भवेत् ॥
× × × × × × × ।
× × × × × × × ॥

Colophon :

इति पाञ्चरात्रे नारदीयसंहितायां चतुर्विंशोध्याये एकादश्यार्चनाविधिः ।

344

Sl. No. 46170 एकादश्यर्चनाविधिः Ms. No. P. 5253/124A

Beginning :

एकादश्यां सिते पक्षे यथावद्विधिपूर्वकम् ।
द्वादश्यां योऽर्चयेद्विष्णुं तस्य पुण्यफलं शृणु ॥
सर्वपापैर्विनिर्मुक्तः सर्वरोगैस्सुदारुणैः ।
इह लोके परान् भोगान् विपुलानीप्सितान् सुखन् ॥

End :

विष्णुलोकमवाप्नोति वैष्णवश्च भविष्यति ।
यः कुर्यान्मासिमास्येवं तस्य पुण्यफलं शृणु ॥
चिन्तयेन्मनसा यद्यत् तत्तत् संप्राप्नुयान्नरः ।
अणिमादिगुणान् भुक्त्वा पश्चात् कैवल्यभाग्भवेत् ॥

Colophon :

इति श्रीनारदीयसंहितायां चतुर्विंशोऽध्याये एकादश्यर्चनाविधिः समाप्तः ।

345

Sl. No. 46185 वृ.पिञ्जलतन्त्रम् Ms. No. B. 803

Beginning :

आदौ सूक्तं समादाय कृत्वा निर्दोषकं मनः ।
जातनादिक्रियायुक्तो सिद्धसूक्तं भविष्यति ॥ १ ॥
भूयो यागस्य संस्कारः सिद्धयो × भविष्यति ।
सैषा परमकल्याणिघरिकामर × × × ॥ २ ॥

End :

नदेया गुरुविद्वेष्टि न देयाद्ब्रह्मघातकी ।
परीक्ष्य देया शिष्याय तस्मै देया तु साधुभिः ॥ २९ ॥
यागं परमिदं ब्रह्मा कथयित्वा .... कावहम् ।
यस्य विज्ञानमात्रेण दरिद्रो नैव मानवः ॥

Colophon :

इति कपिञ्जलतन्त्रे चतुर्थः पटलः ॥

346

Sl. No. 46188 **कपिञ्जलसंहिता** Ms. No. P. 244,1

Beginning :

मेरुश्रृङ्गे महापुण्ये नानारत्नोपशोभिते ।
सिद्धविद्याधराकीर्णे बहुगन्धर्वशोभिते ॥
नानादेवसमाकीर्णे गज.सिंह समावृते ।
यक्षकिन्नरगानाद्यैः बहूदकसमावृते ॥
+ + + + + + + ।
भृङ्गषण्डसमाकीर्णे सुवर्णद्रुमशोभिते ॥

End :

वैष्णवं सकलं तंत्रं त्वत्प्रसादात् श्रुतं मया ।
सर्वविद्यापरं श्रेष्ठं सर्वविद्यार्थकोविद ॥
कपिञ्जलमहाप्राज्ञ प्रणतोऽस्मि महामते ।
एवं वै काश्यपः स्थित्वा प्रणम्य च कपिञ्जलम् ॥

\+ + + + + + + ।

अञ्जलिं शिरसा कृत्वा आश्रमं प्रति संययौ ॥

Colophon :

इति श्रीपाञ्चरात्रे कपिञ्जलसंहितायां पवित्रारोहणं नाम द्वात्रिंशोऽध्यायः ।

इति कपिञ्जलसंहिता समाप्ता ॥

347

Sl.No 46196 कपिञ्जलसंहिता Ms. No. P. 10281/77

Beginning :

द्रव्यशुद्धिविवरम् -

द्रव्यशुद्धिं प्रवक्ष्यामि देवदेवस्य शार्ङ्गिणः ।

स्नपनादीनि सर्वेषां द्रव्याणां च विशेषतः ॥

स्नानाचमनशौचेन प्राणायामेन देशिकः ।

अन्तर्बहिः शरीरस्य साधकस्य विशुध्यति ॥

\+ + + + + + +

End :

संस्थापनेऽप्यशक्तानां सम्प्रोक्षणमुदाहृतम् ।

हविषां दोषयुक्तानां त्याग(?) एवमुदाहृतम् ॥

तुषभस्मे(?)नकं वाथ मुच्यते बुद्धिमृत्तमः ।

देवादिमादिकं कृत्वा नमस्कारमनन्तरम् ॥

मन्त्रे मन्त्रे प्रयुञ्जीत मन्त्रशुद्धिरुदाहृता ।

निर्दोषं तोयमादाय नवपात्रेषु पूरयेत् ॥

नववस्त्रेण पूतेन तोयशुद्धिरुदाहृता ।

Colophon :

इति पाञ्चरात्रे कपिञ्जलसंहितायां द्रव्यशुद्धिविधानं नाम एकोनविंशोऽध्यायः ।

348

Sl. No. 46206 कुण्डनिर्णयः Ms. No. P. 10281/42

Beginning :

कुण्डविवरः

कुण्डमावहनीयस्य चतुरश्रं यथोदितम् ।
दक्षिणस्यां दक्षिणाग्ने दिशि चापसमाकृतिः ॥
कुण्डस्य गार्हपत्यस्य प्रतीच्यां वृत्तमद्भुतम् ।
सभ्यस्य कुण्डकौबेर्यां त्रिकोणं तदनन्तरम् ॥
\+ \+ \+ \+ \+ \+ \+

End :

अश्रं चापं तथा वृत्तं पद्मं पूर्वादिक क्रमात् ।
मुख्यकल्पेतु विप्रेन्द्र अष्टकुण्डं प्रकल्पयेत् ॥
× × × × × × × ।
× × × × × × × ॥
अनुकल्पेतु विप्रेन्द्र चतुष्कुण्डं प्रकल्पयेत् ।
× × × × × × × ॥

Colophon :

– – – – –

349

Sl. No. 46212 कुण्डोत्पादनविधिः Ms. No. P. 2151/50

Beginning :

प्रतिष्ठा लक्षणं कुर्यात्पूर्वोक्त लक्षणान्वितम् ।
भित्यन्तरं चतुर्दिक्षु एकाशीति विभाजयेत् ॥

\+ + + + + + + +

कुण्डानां लक्षणं प्रोक्तं चतुष्कुण्डानि कारयेत् ।

End :

अष्टपत्रे लिखेच्छुभ्रे योनिमश्वत्थपूर्ववत् ।
शालान्तरक्रमं कुर्यात् तन्त्रोक्तं कुशलैर्द्विजैः ॥

Colophon :

इति श्रीपाञ्चरात्रे विष्वक्सेनसंहितायां शालान्तरे कुण्डोत्पत्तिपरिच्छेदः ।

350

Sl. No. 46217 कृच्छ्रप्रत्याम्नायविधिः Ms. No. P. 9545/17

Beginning :

कुच्छ्रप्रत्याम्नायः ॥ मार्कण्डेयः—

अशक्तो यदि चान्द्रस्य भक्षणे राजवल्लभः ।
प्रत्याम्नायं तदा कुर्यात् सवत्सां गां स्वलंकृताम् ॥

पञ्चाशत्संख्यया पूतः सर्वपापान्नसंशयः ।

\+ + + + + + + ॥

End .

माहेश्वरस्य कृच्छ्रस्य प्रत्याम्नाय शृणुष्व मे ।
गावो देया द्विजातिभ्यः ह्यर्चितास्स विभूषणाः ॥

× × × × × × × ।

रुद्रसंख्यासवत्साश्च पयस्विन्यः पृथक्पृथक् ॥

Colophon :

— — — — —

351

Sl. No. 46219 कृत्तिकादीपविधिः Ms. No. P. 3481/60

Beginning :

अथ वक्ष्यामि ते ब्रह्मन् दीपारोपविधिक्रमम् ।
क्षाळयेद्भवनं सम्यगापोहिष्ठेति मन्त्रतः ॥
प्राकारं मण्टपे चैव गोपुरं च महानसम् ।
मज्जयित्वा प्रयत्नेन वायुमन्त्रेण देशिकः ॥

× × × × × × × ।
× × × × × × × ॥

End :

वत्सरैकं चतुर्वक्त्र दीपदानेन यत्फलम् ।
तत्फलं कार्तिके मासि दीपारोपणकृन्नरः ॥
एककालं द्विकालं वा त्रिकालं वाथ कार्तिके ।
दीपमारोपयेदेवं मत्सारूप्यं स गच्छति ॥

Colophon :

इति श्रीपाञ्चरात्रे विष्णुरहस्ये कृत्तिकादीपविधिर्नाम द्वादशोऽध्यायः ।

352

Sl. No 46223 कृत्तिकादीपोत्सवविधानम् Ms·No. P. 5253/90

Beginning :

कृत्तिकोत्सवविधिं वक्ष्ये समासान्मुनिपुङ्गव ।
कृत्तिकापर्वयुक्ते तु दीपारोपणमाचरेत् ॥

ऋक्षयुक्तमयुक्तं वा केवलं पर्वमेव वा ।
महोत्सवमनुप्राप्ते स्नपनं सम्यगाचरेत् ॥

× × × × × × × ।
× × × × × × × ॥

End :

मण्टपं सम्प्रविश्याथ समारोप्य च विष्टरे ।
नृत्तगीतादिकं सर्वं दर्शयित्वा विशेषतः ॥

पुनः पूजां ततः कृत्वा पृथुकादीन् निवेदयेत् ॥
आचार्याय विशेषेण दापयेत् सर्वजन्तुषु ॥

× × × × × × × × ।
× × × × × × × × ॥

Colophon :

इति श्री अनिरुद्धसंहितायां कृत्तिकादीपोत्सवविधिर्नाम पञ्चविंशोऽध्यायः ।

353

Sl. No. 46244 क्रियाकैरवचन्द्रिका Ms. No. P. 4923

Beginning :

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
+ + + + + + + +
श्रीनिधिं कौशिकानन्तदेशिकाब्धिसुधाकरम् ।
प्रपद्ये सर्वशास्त्रज्ञं पेत्तराचार्यमद्गुरुम् ॥

End :

यजमानोऽपि गुरुं जीवाजीवात्मकैर्धनैस्तोषयित्वा प्रणम्य यानमारोप्य सर्वमङ्गलसहितं तन्मन्दिरं नयेत् ॥

Colophon :

इति श्रीवराहगुरुविरचितायां क्रियाकैरवचन्द्रिकायां पवित्रारोहणविधिर्नाम सप्तत्रिंशः परिच्छेदः । श्रीमत्कौशिककलशोदधिसुधाकरस्य श्रीपाञ्चरात्रप्रमुखसकलशास्त्रपारङ्गतस्य श्रीवराहचरणकमलसमर्चननिष्णातस्य श्रीपेत्तराचार्यवर्यस्य सूनुना श्रीसौम्यविश्वाख्यगुरुवर्यकरुणाकटाक्षणलब्धसकलविधेन श्रीवराहदेशिकेन विरचिता श्रीपाञ्चरात्रप्रथमसिद्धान्तक्रियाकैरवचन्द्रिका समाप्ता ।

354

Sl. No. 46250 गरुडध्यानावाहनविसर्जननिर्णयः Ms. No.P. 2161/33

Beginning :

अमृतकलशयुक्तं कान्तसंपूर्णदेहं
सकलविविधविद्यावेदशास्त्रैर्विचिन्त्यम् ।

विविधसुलभरक्षैर्भूयमानाण्डगोलं
सकलविषविनाशं चिन्तायेत्पक्षिराजम् ॥ १ ॥

End :

तत्पठे वैनतेयं च स्तम्भमावाहयेत्क्रमात् ।
महाबलमहाबाहुर्वैनतेयो द्विजाधिपः ॥
सान्निध्यं कुरु पक्षीन्द्र प्रसीद त्वं नमोऽस्तु ते ।
तदूर्ध्वं च प्रयोगेन यथापूर्वं प्रकल्पयेत् ॥

Colophon :

× × × × × × ×

355

Sl. No 46252 गरुडलक्षणविधिः Ms. No. P. 5253/140

Beginning :

तृतीये दिवसे प्राप्ते गरुडं कारयेन्मुने ।
पूर्वोक्तेन विधानेन गरुडं लक्षणागतम् ॥
वसुतालसमायाम चतुस्तालं तु विस्तरम् ।
नागाभरणसंयुक्तं मकुटाद्यैरलङ्कृतम ॥

End :

गरुडं कारयेद्विद्वान् त्रयस्त्रिंशत्तु लक्षणम् ।
देवमरोपयेत् पश्चात् आचार्यः सहमन्त्रवित् ॥
+ + + + + + + ।
ग्रामं परिभ्रमेत् पश्चात् देवेशं पूजयेत्ततः ॥

Colophon :

इति गरुडलक्षणविधिः ।

356

Sl. No. 46253 **गर्भगेहप्रमाणनिर्णयः** Ms No. P. 1028/39

Beginning :

गर्भगेहप्रमाणम्

चतुरश्रं तु वृत्तं वा त्रिकोणमथवापि वा ।
आयतं दशाभिर्हस्तैर्विस्तीर्णं पञ्चभिर्दढम् ॥
मानाङ्गुलप्रमाणेन कारयेद्गर्भमन्दिरम् ।
उपानादादिपञ्चाङ्गमाधिष्ठानं प्रकल्पयेत् ॥
× × × × × × × ।
× × × × × × × ॥

End :

पञ्चहस्ताश्चतुर्हस्ता द्विहस्ता वा यथेच्छया ।
दण्डस्तदर्धं पादोनं तस्योत्सेधः समीरितः ॥
आधिष्ठाने कृते तस्मिन् स्तम्भर्तविवयेत् (?) ।
एकद्वित्रिचर्तुहस्तैः क्रमशो वर्धितो भवेत् ॥
× × × × × × × × ।
× × × × × × × × ।

Colophon :

× × × × × × × ×

Sl. No. 46261 गृहार्चनप्रोक्षणविधिः Ms. No. P. 1028 /121

Beginning :

शौनकीयसंहितायां गृहार्चनसम्प्रोक्षाविधिः ।

अशेषजगदुत्पत्तिस्थितिसंहारहेतवे ।
अशरण्यशरण्यानां गत .... वे नमः ॥

× × × × × × × ×।
× × × × × × × ×॥

संप्रोक्षणविधिं वक्ष्ये गृहार्चनविधौ हरेः ।
येन सम्प्रोक्षिते बिम्बे प्रतिष्ठा स्थापना हरेः ॥

\+ + + + +

End :

मूलेन मन्त्ररत्नेन जुहुयादाहुतेः शतम् ।
मू ... ... न्त्रेण श्रीभूमिसूक्ताभ्यां च श्रियो भुवः ॥ ॥ २६ ॥

प्रत्यर्च्यजुहुयात्पश्चात्तत्रशेषं समाचरेत् ।
विष्वक्सेनं प्रपूज्याथ देवाग्रे गुरुमर्चयेत् ॥

× × × × × × ×।
× × × × × × ×॥

ब्राह्मणान् भोजयित्वाथ यथापूर्वं समर्चयेत् ।
× × × × × × ×॥

Colophon :

इति शौनकीयगृहार्चनसम्प्रोक्षणकारिका नाम × × × ×

358

Sl No. 46274 **गृहार्चासम्प्रोक्षणम्** Ms No. P. 9106/5

Beginning :

पराशरसंहितायाम् —

क्षत्रियादिस्पर्शने च विप्रार्चितहरेः सदा ।
सम्प्रोक्षणविधिं कृत्वा पश्चात् विप्रस्तु पूजयेत् ॥

हारीतः —

अवैष्णवेन विप्रेण शूद्राद्यैरर्चिते हरौ ।
सहस्रमाभिषेकं च पुष्पाञ्जलिसहस्रकम् ॥

End :

पुं सूक्तेन विधानेन जुहुयात् षोडशाहुतीः ।
मूलमन्त्रेण हुत्वाऽग्निं मूर्तिमन्त्रेण वैसकृत् ॥
देवोऽग्रे गुरुमभ्यर्च्य वैष्णावान् परितोषयेत् ।
हरिमभ्यर्चयेन्नित्यं यथापूर्वं द्विजोत्तमः ॥

Colophon :

हरिः ओम्

359

Sl. No. 46277 **गृहार्चास्नपनविधिः** **Ms. No. P. 9553 14**

Beginning :

गृहार्चने स्नपनविधिप्रकारः —

गृहार्चायाः स्नपने तु लघुमन्त्रं समाचरेत् ।
अधिवासनवेद्यादि यन्त्र मन्त्रं विवर्जयेत् ॥

एकत्र पञ्चगव्येतु विनिक्षिप्य परेऽहनि ।
पञ्चामृतैः स्नापयित्वा पश्चादुद्वर्तनादिकम् ॥

End :

एवं गृहार्चविम्बं तु विष्णु संस्थाप्य वैष्णवः ।
अर्थयेद्विधिना विष्णुं यावद्देहनिपातनम् ॥

Colophon :

इति श्रीपाञ्चरात्रे पारमेश्वरसंहितायां गृहार्चनास्नपनविधिस्सम्पूर्णः ।

360

Sl No. 462o1 ग्रामविन्यासः Ms. No. P. 1669/52

Beginning :

कपिञ्जलः —

प्रवक्ष्येऽहं समासेन ग्रामविन्यासलक्षणम् ।
स्वर्गार्थं च यशो-र्थं च दानार्थं च जयाय च ॥
× × × × × × × × ।
देवानां पूजनार्थं च कुर्याद्ग्रामं द्विजोत्तम ॥

End :

पर्वताग्रे यथाकामं प्रासादं साधकोत्तमः ।
इति सम्यक्समाख्यातं ग्रामविन्यासलक्षणम् ॥

Colophon :

इति श्रीपाञ्चरात्रे कपिञ्जलसंहितायां ग्रामविन्यासो नाम नवमोऽध्यायः ।

361

Sl. No. 46286 **ग्रामशान्तिविधिः** Ms. No. P. 4984/33

Beginning :

अथातः सम्प्रवक्ष्यामि ग्रामशान्तिविधिक्रमम् ।
सर्वपापहरं पुण्यं सर्वक्षोभनिवारणम् ॥
आयुरारोग्यफलदं पुत्रश्रीकीर्तिवर्धनम् ।
ग्रामशान्तिविधिं वक्ष्ये शृणुष्व कमलोद्भव ॥

End : ....

आचार्यं पूजयेत्पश्चा वस्त्राभरणमूल्यकैः ।
दक्षिणां दापयेत्पश्चाद्यथावित्तानुसारतः ॥
तदर्धं ऋत्विजां चैव तदर्धं परिचारिणाम् ।
सेवाजनान् प्रपूज्याथ यथाशान्तिर्भवेत्ततः ॥
× × × × × × × × ।
इहोपयुक्तद्रव्याणि आचार्याय निवेदयेत् ॥

Colophon :

इति पाञ्चरात्रे ब्रह्मसंहितायां ग्रामशान्तिविधिर्नाम द्वादशोऽध्यायः ।

362

Sl. No. 46288 **घण्टाताडननिर्णयः** Ms. No. P. 2380/11

Beginning :

पाञ्चरात्रे वसिष्ठसंहितायाम्—

आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् ।
कुरु घण्टारवं तत्र देवताह्वानलक्षणम् ॥

गृहार्चनविधानेतु शङ्खघण्टारवं त्यजेत् ।
पञ्चसंस्कारयुक्तानां वैष्णवानां विशेषतः ॥

End :

गृहार्चने यः कुरुते रौरवं नरकं व्रजेत् ।
प्रसन्नो नियतो विप्रः प्रत्यहं पद्मसंभव ॥
× × × × × × × ।
गृहार्चनविधौ शङ्खं घण्टानादं च वर्जयेत् ॥

Colophon :

॥ हरिः ओम् ॥

363

Sl. No 46290 **घटदीपपूजाविधिः** Ms. No. P. 4977/43

Beginning :

श्रीभगवानुवाच—

त्रिपादं च त्रिदैवत्यं वृत्तं चक्राधिदेवता ।
एवमेव प्रकारेण पादाधारस्य देवता ॥
पञ्चविंशाङ्गुलायामं षोडशाङ्गुलविस्तृतम् ।
वृत्तपादसमायुक्तं अग्रे पद्मलमन्वितम् ॥
कुम्भस्याग्रे मुखे रुद्रः मध्ये विष्णुस्तथैव च । +
पार्श्वयोस्सर्वदेवाश्च घटदीपस्य देवताः ॥

End :

घटदीपं समादाय अर्चयित्वा यथाक्रमम् ।
मूर्धादिपादपर्यन्तं चक्राकारं त्रिवेष्टनम् ॥

× × × × × × × ।

त्रिप्रदक्षिणमावर्त्य क्षिपेदावरणाद्बहिः ॥

Colophoh :

\+ + + + + + +

364

Sl. No. 46292 चक्राङ्कनविधिः Ms.No P. 9545/10

Beginning :

उदरे हृदि कण्ठे च

दशाष्टचतुरङ्गुलान् ।

दक्षिणोत्तरबाहुंसे–

एवं त्रीणीतरत्र च ॥

पशुपुत्रादिकं सर्वं

गृहोपकरणानि च ॥

End :

कोदण्डस्य धनुर्मासे

मुद्गान्नं तु निवेदयेत् ।

सहस्रशीर्षका पूजा

दिनेनैकेन लभ्यते ॥

Colophon :

॥ श्रीः ॥

365

Sl. No. 46297 **चतुर्विंशतिमूर्तिभेदाः** Ms. No. P. 9545/15

Beginning :

केशवस्याम्बुजं शङ्खं चक्रदण्डं नमो नमः ।
प्रादक्षिण्येन बाहूनां अन्येषामुच्यते क्रमात् ॥
× × × × × × × ।
नारायणं शङ्खपद्मं गदाचक्रं नमो नमः ॥

End :

चतुर्विंशतिमूर्तीनां श्रीभेदं यः पठेन्नरः ।
सर्वपापैर्विनिर्मुक्तः विष्णुसायुज्यमाप्नुयात् ॥

Colophon :

इति पाक्षेक्रियापादे [चतुर्विंशतिमूर्तिकथनम्] ॥

366

Sl. No. 46299 **चतुर्विंशतिमूर्तिलक्षणम्** Ms. No. P. 7970/105

Beginning :

अथ चतुर्विंशतिमूर्तिलक्षणान्युच्यन्ते—
शङ्खचक्रगदापद्मं केशवस्य ।
खड्गपद्मगदाचक्रं नारायणस्य ।
गदाचक्रशङ्खपद्मं माधवस्य ।
चक्रगदाशङ्खपद्मं गोविन्दस्य ।
शङ्खचक्रं विष्णोः ।

End :

गदापद्मचक्रशङ्खं अच्युतस्य ।
पद्मशङ्खचक्रगदा जनार्दनस्य ।
शङ्खगदाचक्रपद्मं उपेन्द्रस्य ।
शङ्खचक्रगदापद्मं हरेः ।
शङ्खगदापद्मचक्रं श्रीकृष्णमूर्तेः ॥

Colophon :

इति चतुर्विंशतिमूर्तिलक्षणविधिः ।

367

Sl. No. 46309 **जयन्तीतिथिनक्षत्रनिर्णयः** Ms. No. P. 5253/61

Beginning :

जयन्ती द्विविधा प्रोक्ता विद्धा चैव चतुर्विधा ।
तस्मात् सर्वप्रयत्नेन सप्तमीं कृत्तिकामपि ॥
कलामात्रमपि त्यक्त्वा पुरतो व्रतमाचरेत् ।
रोहिणीरहिता वापि या हि शुद्धाष्टमी भवेत् ॥

End :

जयन्तीवासरे प्राप्ते पञ्चकालरतात्मभिः ।
करणीया प्रयत्नेन रात्रावेव तु पारणा ॥
निवेदितं तु देवस्य भक्त्या भागवतान् प्रति ।
दातव्यं तैरपि तदा करणीयाऽपि पारणा ॥

Colophon :

इति श्रीसनत्कुमारसंहितायां जयन्तीनिर्णयो नाम सप्तदशोऽध्यायः ॥

368

Sl. No. 46312 **जयन्त्युत्सवप्रकारः** Ms. No. P. 5253/65

Beginning :

पूर्वविद्धाऽष्टमी त्याज्या उदये नवमीयुता ।
मुहूर्तेनापि संयुक्ता सा सम्पूर्णाऽष्टमी भवेत् ॥
सप्तमीसंयुताष्टम्यां मुक्त्वा ऋक्षं द्विजोत्तम ।
प्राजापत्यं द्वितीयेहि मुहूर्तार्धं भवेद्यदि ॥

End :

उपभारांश्च विविधान् अर्पयित्वा मुरद्विषः ।
ताम्बूलाद्युपचारैश्च तोषयेश्च श्रियः पतिम् ॥
इत्थं यः कारयेद्भक्त्या जयन्त्युत्सवमुत्तमम् ।
अभीप्सितार्थान् सम्प्राप्य केवलं पदमाप्नुयात् ॥

Colophon :

इति श्रीनकूबरसंहितायां जयन्तीनिर्णयोत्सवप्रकारोल एकविंशोऽध्यायः

369

Sl. No 46317 **जयन्त्युत्सवविधिः** Ms. No. P. 5253/70

Beginning :

जयन्त्यामुपवासं तु कृत्वा योऽर्चयते हरिम् ।
तस्य जन्मशतोद्भूतं पापं नाशयतेऽच्युतः ॥
कौमारे यौवने बाल्ये वार्धक्ये यदुपार्जितम् ।
तत् पापं शमयेत् कृष्णः तिथावस्यां प्रपूजितः ॥

End :

कार्तिके मासि रोहिण्यां अन्येष्वेवं विधेष्वपि ।
अवतारदिनेष्वेवं कुर्यादेकाहकोत्सवम् ॥
ग्रामे वा नगराद्ये वा सर्वेष्वावरणेषु वा ।
शुभलीलासमायुक्तं आचरेत्तु परिभ्रमम् ॥

Colophon :

इति श्रीपारमेश्वरे क्रियाकाण्डे जयन्त्युत्सवविधिः सप्तदशाध्यायः ।

370

Sl. No. 46323 जलाधिवासः Ms. No. P. 1349/5

Beginning :

ब्रह्मोवाच—

व्यापिनो देवदेवस्य प्रतिष्ठा कीदृशी मता ।
भगवन् संशयानस्य मम संशयदो भव ॥

श्रीभगवानुवाच—

× × × × × × × × ।
सर्वस्य(?)भूतजातस्य हरिरन्तःस्थितोऽपि सन् ॥

End :

सुकृतेषु यथाशास्त्रं कर्मान्ते देशिको तमः ।
× थाकारेण विदुषा सुनिरूप्य निरूपकः ॥
(?)दनैश्लक × × × × × × × ।
× × × × × × × ॥

Colophon :

× × × × × × ×

371

Sl. No. 46324 जलाधिवासहानिप्रायश्चित्तम् Ms. No. P. 3481/17

Beginning :

अथातः सम्प्रवक्ष्यामि प्रायश्चित्तं द्विजोत्तम ।
जलाधिवासने हीने स्नपनं मध्यमोत्तमम् ॥
कृत्वा तु देवदेवेशं प्रतिष्ठां सम्यगाचरेत् ।
कल्प्यते सति विघ्नश्चेज्जलवासे तु सम्भवे ॥
+ + + + + + + + ।
+ + + + + + + + ॥

End :

पञ्चोपनिषदैर्मन्त्रैः समिदाज्यचरून् क्रमात् ।
पृथगष्टोत्तरशतं हुनेद्रैरूप्यमूर्तितः ॥
+ + + + + + + ।
+ + + + + + + ॥
ब्राह्मणान् भोजयेत्पश्चाद्गुरवे दक्षिणां दिशेत् ।
शतभारतिलं वापि निष्कहेममथापि वा ॥
नयनोन्मीलनद्रव्यं सर्वं तद्गुरवे समादिशेत् ।
+ + + + + + + + ॥

Colophon :

× × × × ×

372

Sl. No. 46325 जातिनक्षत्रविवरणम् Ms. No. P. 5253/171

Beginning :

मृगशीर्षं तु विप्राणां क्षत्रियाणां तु ज्येष्ठता ।
वैश्यानां पूर्वभेवो ऽ शूद्राणामश्विनी भवेत् ॥

जन्मनामर्क्षयोः श्रेष्ठं जन्मभं मध्यमं भवेत् ।
अधमं नामनक्षत्रं योजयेत्त्रिविधं भवेत् ॥

End :

प्रोष्ठभं पुत्रमित्रं स्यात् अहिर्बुध्न्यायुवर्धनः ।
पौष्णभं रोगदं विद्यात् नक्षत्राणां फलानि वै ॥

कवाटवन्धनेकाश्च स्थपतिस्थापकैस्सह ।
देवहीनं समाख्यातं बन्धनं दृढबन्धनम् ॥

Colophon :

॥ हरिः ओम् ॥

373

Sl. No. 46329 जीर्णोद्धारविधिः Ms. No. P. 4984/57

Beginning :

एवं बिम्बं प्रतिष्ठाप्य प्रासादे स्वगृहे तु वा ।
ततः प्रभृति तामर्चां पूजयेत्प्रतिवासरम् ॥

जीर्णोद्धारविधिर्यावत्तावत्कालं विधानतः ।
प्रमादाद्बुद्धिपूर्वाद्वा पूजालोपं न कारयेत् ॥

+ + + + + + +

End :

येषु व्यक्तेषु चिह्नानि नाभिव्यक्तानि सत्तम ।
नान्यान्यपि स्वान्यचिह्नानि ललाटे वासपट्टके ॥
पृष्ठे वाप्यङ्कपट्टे वा पाणिपादतलेषु वा ।
मूर्ध्नि वा दधते तस्मात्तत्र तत्र निरीक्षयेत् ॥

× × × × × × × ×।

तस्मादलक्षणव्यक्तिर्विद्यते न कदाचन ॥

Colophon :

इति पाञ्चरात्रे पारमेश्वरे क्रियाकाण्डे प्रतिष्ठाध्याये परभागे जीर्णोद्धार-विधिर्नाम पञ्चदशोऽध्यायः ।

374

Sl. No. 46338 जीर्णोद्धारसंप्रेक्षणविधिः Ms. No. P. 4907/62

Beginning :

ब्रह्मोवाच –

संप्रोक्षणनिमित्तं किं प्रकारो वाऽस्य कीदृशः ।
कथ्यतां भगवन् मह्यं जिज्ञासा मेऽनुवर्तते ॥

श्रीभगवानुवाच –

+ + + + + + + +।

प्रासादे चाङ्गभङ्गादि सन्धाने नूतने कृते ॥

End :

आचार्यदक्षिणा वाऽपि दशनिष्कावरा तदा ।
सद्यो वा सकलं कुर्यात् निशि वा दिवसेऽपि वा ॥

Colophon :

इति श्रीपाञ्चरात्रे महोपनिषदि पाद्मे चर्यापादे जीर्णोद्धारसम्प्रोक्षण-विधिर्नाम सप्तदशोऽध्यायः ।

375

Sl. No. 46339 डोलारोपणोत्सवविधिः Ms. No. P. 5253/30

Beginning :

अथातः संप्रवक्ष्यामि डोलारोपणमुत्तमम् ।
शृणुष्व सावधानेन डोलास्थापनपूर्वकम् ॥
उत्तरायणपूर्वे तु दक्षिणायन एव वा ।
चैत्रे तु शुक्लपक्षेतु अपरं वर्जयेत्ततः ॥

End :

राजराष्ट्रविवृद्ध्यर्थं आयुरारोग्यवर्धनम् ।
स्थानवृद्धिकरं चैव राजभूसुरवर्धनम् ॥
एवं यः कारयेद्भक्त्या अचलां श्रियमाप्नुयात् ।
इह लोकेऽखिलान् भोगान् भुक्त्वावान्ते परं पदम् ॥

Colophon :

इति श्रीनारायणसंहितायां डोलारोपणमहोत्सवविधिर्नाम चतुश्चत्वारिंशोऽध्यायः ।

376

Sl. No. 46342 डोळोत्सवनिर्णयः Ms. No. P. 4396/11

Beginning :

श्रीपराशरः—

नित्यं सायाह्नसमये डोळायां पूजयेद्धरिम् ।
चतुरस्तम्भसमायुक्तां दिव्यं चतुर्दामविराजिताम् ॥

× × × × × × × ।
× × × × × × × ॥

दिव्यस्रग्वसनोपेतां शिबिकां परिकल्पयेत् ।
स्तम्भेषु चतुरो वेदानावाह्यात्रप्रपूजयेत् ॥

+ + + + + + + ।
इतिहासपुराणानि वेदाङ्गानि तथैव च ॥

End :

यस्तु पश्येत् शुभां डोळां हरेर्नारायणस्य वै ।
सः स्नातस्सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः ॥

गवामयुतदानस्य फलमाप्नोत्यसंशयः ।
सर्वपापविनिर्मुक्तः विष्णुसायुज्यमाप्नुयात् ॥

× × × × × × × × ।
× × × × × × × × ॥

Colophon :

इति पराशरधर्मशास्त्रे उत्तरखण्डे एकोनविंशोऽध्यायः ।

377

Sl No. 40344 तन्त्रसङ्करदोषप्रायश्चित्तविधिः Ms. No. P. 4984/25

Beginning :

बिम्बे तु लोमसंसृष्टे प्रतिलोमैश्च गर्हितैः ।
स्नपनं शान्तिहोमं च सदानं सर्वदा चरेत् ॥
× × × × × × × ।
× × × × × × × ॥
वैखानसैस्तु संसृष्टे पयस्स्नानेन शुध्यति ।
आराधिते स्वमार्गेण प्रतिष्ठामाचरेत्पुनः ॥
\+ \+ \+ \+ \+

End :

वैखानसं च शैवं च पञ्चरात्रेण संयुतम् ।
तन्त्रसङ्करदोषेण राजराष्ट्रं विनश्यति ॥
× × × × × × × × ।
× × × × × × × × ॥
जितंत इति मन्त्रेण अष्टोत्तरशतं पृथक् ।
समिदाज्यचरून् हुत्वा पुण्याहं तत्र कारयेत् ॥
तस्मात्सर्वप्रयत्नेन तन्त्रसङ्करवर्जनम् ।
× × × × × × × × ॥

Colophon :

इति विष्णुविधाने ।

378

Sl. No. 46345 **तन्त्रसङ्करनिर्णयः** Ms. No. P· 4984/48

Beginning :

तन्त्राणां सङ्करं वक्ष्ये नमस्ते वसु पूजक ।
भाक्तं भागवतं चैव सात्वतं वैष्णवं त्रिधा ॥
वैदिकं तान्त्रिकं चैव तथा वैदिकतान्त्रिकम् ।
त्रिविधं तन्त्रमुद्दिष्टं पञ्चरात्रविशारदैः ॥
+ + + + +

End :

सात्वतेनैव शास्त्रेण महाद्धा यदि सङ्करः ।
कर्ता नाशमवाप्नोति वर्जयेत्सिद्धिकाङ्क्षिभिः ॥
तस्माद्यत्नेन कर्तव्यं तत्तद्बिम्बे नियोजयेत् ।
प्रायश्चित्तं तथा कार्यं स्नपनं द्विजभोजनम् ॥

Colophon :

इति हिरण्यसंहितायाम् ।

379

Sl. No. 46351 **तप्तचक्राङ्कविधिः** Ms. No. P. 4212/20

Beginning :

विष्णुरहस्ये—
दीक्षा हि विविधा प्रोक्ता बाह्याभ्यन्तरभेदतः ।
ज्ञानिनामुभयोस्तत्र बाह्यैव ज्ञानिनां भवेत् ॥

अयं सर्वेष्टदातमे सर्वारिष्टनिवारकः ।
सर्वोत्कृष्टेऽयमेवैकः तदायोहं समोपतिः ॥

End :

गायत्र्यादिषु मन्त्रेषु वेदस्याध्ययनेषु च ।
अतस्र चक्रगात्रोपि नाधिकारी भवेध्द्रुवम् ॥
स्वस्ववर्णोर्ध्वपुण्ड्रेषु हृदिबाहूदरादिषु ।
× × × तद्भक्त्या तत्परायणः ॥

Colophon :

\+ + + + +

380

Sl. No. 46384 **तुलसीदलनियमः** Ms. No. P. 4212/15

Beginning :

चतुः कर्णे मुखे चैकं नाभावेकं तथैव च ।
शिरस्येकदलं प्रोक्तं तीर्थे त्री.ोदल.नि च ॥
× × × × × × × ।
अन्नो.रि दलं पञ्च भोजनान्ते दलत्रयम् ॥

End :

ऊर्ध्वं निक्षिप्य दैत्यं तदुदर–
कुहरं दारयन्तं च दोर्भ्यां ।
रक्तज्वालामयं ज्वर ×
× × भये चिन्तयेदुग्रसिंहम् ॥

Colophon :

\+ + + + +

381

Sl. No. 46390 **तोयाद्युत्सवविधानम्** Ms. No. P. 5253/33

Beginning :

वैशाखे च विशाखर्क्षे विशेषयजनं भवेत् ।
सहकारफलैः पक्वैः गुळकीरादि × चितैः ॥

त योत्सवमथो वक्ष्ये सहस्रकलशात्मकम् ।
अनूराधे तु मासर्क्षे आषाढेत्वथवा भवेत् ॥

× × × × × × × ।
× × × × × × × ॥

End :

तोयोत्सवं तु यः कुर्यात् स याति ब्रह्मणःपदम् ।
पुष्पोत्सवं तु यः कुर्यात् अतुलां श्रियमाप्नुयात् ॥

पत्रोत्सवं तु यः कुर्यात् सायुज्यं गच्छति ध्रुवम् ।
फलोत्सवं तु यः कुर्यात विष्णुलोकं स गच्छति ॥

× × × × × × × ।
× × × × × × × ॥

Colophon :

इति श्रीअनन्ताख्यसंहितायां तोयाद्युत्सवविधानं नाम दशमोऽध्यायः ॥

382

Sl. No. 46392 त्रिकालार्चनाक्रमः Ms. No P. 1669/71

Beginning :

प्रातस्तु दशनाब्यस्तु सात्त्विकं विष्णुमेव च ।
तत्काले शुभवस्त्रं च मौक्तिकं हारमेव च ॥
× × × × × × × × ।
श्वेतमाल्यं सुगन्धश्च श्वेतद्रव्यं विधीयते ॥

End :

श्वेताब्जं कुसुदं चैव मल्लिकाजाजिमालिका ।
माधवी करवीरेण हिंबेरं गजकर्णिका ॥
× × × × × × × × ।
मरुवं दवनकं चैव सायं कालार्चने दश ॥

Colophon :

इति श्रीपञ्चरात्रे विष्णुसिद्धान्ततिलके त्रिकालाराधनक्रमः समाप्तः ।

383

Sl. No. 46399 दर्भकूर्चादिलक्षणम् Ms. No. P. 1397/24

Beginning :

कुशकाशयवा दूर्वाः उशीराश्च शकुन्दराः ।
गूधूमव्रीहयो मोञ्जाः दश दर्भाश्च बर्बजाः(?) ॥
विश्वामित्रकुशाः काशाः शालिमौञ्जी यवास्तथा ।
दूर्वाश्चैव मुनिश्रेष्ठ सप्त दर्भाः प्रकीर्तिताः ॥

End :

महाकुम्भं च कूर्चं च शान्तिवर्धनिकस्य च ।
ब्रह्मकूर्चसमं कुर्यात् देशिकस्तत्र पारगः ॥

Colophon :

॥ श्रीः ॥

384

Sl. No 46402 दशमीनिर्णयः Ms. No. P. 5253/127

Beginning :

हरिदिनमुपवासैर्यः क्षजेत् प्रासजन्तुः
न विशति जठरं वै मूत्रपूर्णं जनन्याः ।
बहुवृजिनसमेतः कामरोगाभिभूतः
व्रजति पदमनन्तं लोकनाथस्य विष्णोः ॥

End :

नास्ति नास्ति पुनर्नास्ति पातकैर्ध्वस्तसंशयः ।
धनधान्यसमृद्धिं च पुत्रपौत्राश्च सम्पदः ॥
इष्टकाम्यफलं सद्यो दीर्घमायुरवाप्नुयात् ।
समस्तपापराशीनां दीर्यन्ते हरिवासरे ॥
+ + + + + + + ।
एकादशीफलं तेषां तद्विष्णोः परमं पदम् ॥

Colophon :

समाप्तोऽयं दशमीनिर्णयः ।

385

Sl. No. 46403 दशावतारकालनिर्णयः Ms. No. P. 10281/12

Beginning :

चैत्रे मास्यसिते पक्षे त्रयोदश्यां तिथौ विभुः ।
उद्भूतो मत्स्यरूपेण रक्षार्थमवनेर्हरि. ॥ १ ॥
ज्येष्ठे मासि तथा कृष्णे द्वादश्यां भगवानजः ।
मन्दरं पृष्ठतः कृत्वा कूर्मरूपं हरिर्दधौ ॥ २ ॥
+ + + + +

End :

मासे तु श्रावणेऽष्टम्यां निशीथे कृष्णपक्षके ।
प्राजापत्यर्क्षसंयुक्ते कृष्णं देवक्यजीजनत् ॥ ९ ॥
मासि भाद्रपदे शुक्ल द्वितीयायां जनार्दनः ।
म्लेच्छाक्रान्ते कलावन्ते कल्किरूपो भविष्यति ॥ १० ॥

Colophon :

+ + + + + + +

386

Sl.No. 46406 दिवारात्रिस्तपननिर्णयः Ms. No. P. 10281/29

Beginning :

दिवारात्रिस्तपनविषयः—

निशोत्सवादौ देवस्य स्तपनं तु समाचरेत् ।
दिवोत्सवसमारम्भे नाचरेत्स्नपनं विभोः ॥

यद्वोभयसमारम्भे कुर्यादिच्छानुरूपतः ।
आचन्ते स्तपनं कुर्यादुत्सवेऽस्मिन् विशेषतः ॥

End :

गङ्गादिसर्वतीर्थानां फलं याति सुनिश्चितम् ।
विम्बाभिषेकं हारिद्रचूर्णं ये धारयन्ति ते ॥
विमुक्ताः सर्वदुरितैरन्ते यान्ति परं पदम् ।
विष्णोः प्रसादं यो भुंक्ते मुच्यते सर्वपातकैः ॥

Colophon

_ _ _ _ _

387

Sl. No. 46407 दिव्यदेशाः Ms. No. P. 1669/92

Beginning :

अष्टोत्तरशतस्थानेष्वाविर्भूतं जगत्पतिम् ।
नमामि जगदाधीशं नारायणमनव्ययम् ॥
श्रीवैकुण्ठे वासुदेवं मोदे संकर्षणाह्वयम् ।
प्रद्युम्ने च प्रमोदाख्यं संमोदे च.निरुद्धकम् ॥

End :

तोताद्रिं पुष्करं चैव नरनारायणाश्रमम् ।
अष्टौ मे मूर्तयः सन्ति स्वयं व्यक्ता महीतले ॥

Colophon :

॥ श्रीः ॥

388

Sl. No· 46413 दीक्षाविधिः Ms No. P. 1669/2

Beginning :

अथातस्संप्रवक्ष्यामि दीक्षालक्षणमुत्तमम् ।
प्रथमं अग्रदीक्षा च द्वितीयं वैष्णवं तथा ॥
+ + + + + + + ।
तृतीयमागमं चैव त्रिविधं दीक्षलक्षणम् ॥

End :

अथ वक्ष्यामि विंप्रेन्द्र पाञ्चरात्रार्थमुत्तमम् ।
पृथिव्यादीनि भूतानि गुणाः पञ्चमहामते ॥
+ + + + + + + ।
आचार्यं वरयेत्पूर्वं तत्तत्कर्माणि कारयेत् ॥

Colophon :

इति श्रीपाञ्चरात्रे कपिञ्जलपाद्मसारे आचार्यलक्षणं नाम प्रथमोऽध्यायः ॥

389

Sl. No. 46414 दीपस्तम्भप्रतिष्ठाविधिः Ms·No. P. 2151 34

Beginning :

अथातस्सम्प्रवक्ष्यामि दीपदण्डस्य लक्षणम् ।
शतमष्टोत्तरं तालं एकाशीतिस्तथैव च ॥
तदर्धं मध्यमं प्रोक्तं अधमं चार्धकं भवेत् ।
शिल्पशास्त्रप्रमाणेन शिल्पिहस्तेन गण्यते ॥

End :

इत्येते क्रममार्गेण स्थापनं विधिमुत्तमम् ।
स्तम्भाग्रे पूजयेच्चैव तत्फलं विधिवद्द्विजः ॥
शतमष्टोत्तरस्थाने कोटिज्योतिफलं भवेत् ।
कर्तारो भूपतिर्वापि सर्वाजन(?) सुखी भवेत् ॥

Colophon :

इति श्रीपाञ्चरात्रे संहितासारे दीपस्तम्भप्रतिष्ठापनं नाम अष्टमोऽध्यायः ।

390

Sl. No. 46419 दीपोत्सवविधिः Ms. No.P. 1349/13

Beginning :

संवत्सरे तु सौम्यस्य ग्रहणं यद्दिने भवेत् ।
तद्दिनं वर्जयेद्दीपं तद्वत्सूर्यग्रहं त्यजेत् ॥
कार्तिके मासि नक्षत्रे कृत्तिकाख्ये विधौ ग्रहे ।
तज × × × येत्येते तद्दिनं वा परित्यजेत् ॥

End :

इति मन्त्रं समाख्यातं शास्त्रमेव मनीषिभिः ।
तन्त्राणां नामधेयानि यानि × × त्यंपठेनरः ॥
× × × × × × × × ।
सर्वपापैर्विनिर्मुक्तः यामि ब्रह्म सनातनम् ॥

Colophon :

इति श्रीपाञ्चरात्रे महोपनिषदि पात्मे (?) तन्त्रे ज्ञानपादे प्रश्नतंपपरिग्रहो(?) नाम प्रथमोऽध्यायः ॥

391

Sl. No. 46424 देवतान्तरशिलादारुदोषनिर्णयः Ms.No. P. 10281/90

Beginning :

देवतान्तरशिलादारुदोषः ·

मुख्य शिलामयं धाम मध्यमं चेष्टकामयम् ।
+ + + दारुजं विद्यान्मृण्मयं हेममुच्यते ॥

मिश्रे शिलादिमिद्रव्यैरेकानेकत्वयोगतः ।
सञ्चितासञ्चिते स्यते(?) मुपसञ्चितमेव च ॥

× × × × × × × × ।
× × × × × × × × ॥

End :

न्यायेन सञ्चितैर्द्रव्यैर्निर्मिते हरेः ।
फलमक्षयमाप्नोति यजमानो न संशयः ।

× × × × × × × ।
× × × × × × × ॥

अन्यायोपार्जितैर्द्रासुरानि भुञ्जते फलम् ।
जलेन समतावीक्ष्य विन्यस्य प्रतिकृतिक्षितौ ॥

× × × × × × × ।
तस्यामादाय फलकां प्रथमं शास्त्रचक्षुषा ॥

Colophon :

× × × × × ×

392

Sl. No. 46437 **देवताविसर्जनविधिः** Ms. No. P. 1669/38

Beginning :

स्वस्तिसमस्तलोकप्रस्तूयमानप्रशस्तयशस्तोमकस्तूरिकाकल्कदर्मितनिस्तुल-
स्थूलमुक्तादामस्तोमपरिष्कृतघोरान्तराळ ।

End :

अभ्यनुज्ञामभिगम्ययन्तः—अप्पणतीसुकोनिकोन्नवालेंमीमीदेशकालकुपो-
यरंम्मनिस्वामि आनतिस्ताकुन्नारु ॥

Colophon :

इति श्रीपाञ्चरात्रे कपिञ्जलसंहितायां देवताविसर्जनं नाम पञ्चविंशोऽ-
ध्यायः ।

393

Sl. No. 46442 **देवताह्वानमण्डलोद्धरणविधिः** Ms. No. P. 2151/6

Beginning :

वन्दे पतत्रिणां श्रेष्ठं विनतानन्दवर्धनम् ।
नागान्तकं महाशौर्यं गरुडं विष्णुवाहनम् ॥

श्रीमत्सुरासुर-मुनिवर-सिद्ध-विद्याधरगरुड-गन्धर्व-यक्ष-रा... वि...दा-
रविन्दसव.लभुवनत्राणधुरीणबाहुवीर्य + + + +

End :

ध्यानमावाहयेच्चैव पूजयेद्‌द्वा दशाक्षरैः ।
शालितण्डुलमादाय आढकं मण्डलोपरि ॥
+ + + + +

आरोहणावभृतान्तं मनो रम्यस्थलेऽपि च ।
दिक्याने (?)देवयो चैव विष्णोरुत्सवसेवकम् ॥
तत्कुम्भोद्वासयेच्चैव उदकं पीठमार्जनम् ।
× × × × × × × ॥

Colophon :

इति अगस्त्यसंहित यां देवताह्वानकलशमण्डलोद्धारणं नाम विंशोऽध्याय ।

394

Sl. No. 46449 **देवलकनिर्णयः** **Ms. No. P. 10281/113**

Beginning :

देवलकलक्षणम्—

कर्मदेवलकाः केचित् कल्पदेवलकाः परे ।
शुद्धदेवलकाः केचित् त्रिधा देवलकाः स्मृताः ॥
× × × + र्थी कालनिर्देशी कर्मदेवलकाः स्मृताः ।
अनेनैव प्रकारेण वत्सरत्रयपूजकः ॥

End :

यो भक्त्या अर्चयेद्देवं ग्रामार्चा हरिमव्ययम् ।
प्रसादतीर्थसेवी च नासौ देवलको भवेत् ॥
नारदीयसंहितायाम्—
दुर्गा च भद्रकाली च क्षेत्रदेवगणाधिपाः ।
रुद्रपूजार्चनं कुर्यात्सवै देवलकः स्मृतः ॥

Colophon :

+ + + + +

395

Sl. No. 46453 देवाशीर्वादचूर्णिका Ms. No. P. 928/5

Beginning:

देवेशस्य विराजमानवपुषः सेवार्थमागच्छतां
विप्राणां श्रुतिशैखशालिवपुषां राज्ञा प्रभूणां नृणाम् ।
श्रीमद्ग्रामनिवासिनां हरिवचः कर्तुं समुत्साहिनां
आशीर्वादमहं करोमि विदुषां सब्रह्मघोषाः वयम् ॥

End :

राजा धार्मिको विजयी च भवतु । भूतगणप्रयोगशान्तिरस्तु । सर्वेजनाः सुखिनो भवन्तु । काले वर्षतु पर्जन्यः । गोब्राह्मणेभ्यः शुभं भवतु । समस्तसन्मङ्गलानि भवन्तु ॥

Colophon :

\+ \+ \+ \+ \+

396

Sl. No. 46461 द्राविडप्रबन्धपारायणप्रमाणम् Ms. No. P. 10281/140

Beginning :

द्राविडप्रबन्धपारायणविषयम्—
पारमेश्वरसंहितायाम् -
पुरतो देवयात्रायां द्राविडश्रुतिलक्षणम् ।
आबद्धपाणयो हर्षात्पठेयुः परमास्तुतिः ॥

वासुदेवसंहितायाम्—

ऋगादीन् देवयात्रायां दक्षिणादिषु वै क्रमात् ।
पठेद्वागे तु पुरतः स्तुतीरन्यांश्च मानुषीः ॥

End :

निमन्त्रितानां विप्राणां भोजनानन्तरं द्विज ! ।
तेषां पादोदकं पित्रे स्वयमाहृत्य तद्द्वयम् ॥
मिलित्वाविधिवत्पीत्वा कृतकृत्यो भविष्यति ।
आशौचं विद्यतेनैव सूतके मृतके तथा ॥
येषां पादोदकं भक्त्या प्राशनं येऽपि कुर्वते ।
तस्मात्सर्वप्रयत्नेन पादतीर्थं सुपावनम् ॥

Colophon :

इति श्रियःपतेरग्रतः द्राविडप्रबन्धपारायणप्रमाणम् ।

इति पाञ्चरात्रे विजयसंहितायां मातापितृश्राद्धदिवसे द्राविडप्रबन्धपारायणपादतीर्थविषयो नाम एकचत्वारिंशोऽध्यायः ।

397

Sl. No. 4470 ध्वजस्तम्भप्रतिष्ठाविधिः Ms No. P. 8298/13

Beginning :

अथातः सम्प्रवक्ष्यामि ध्वजस्तम्भस्य × व च ।
सावर्णरञ्जितं ताम्रं प्रतिष्ठा देशिकोत्तम ॥
ध्वजस्तम्भप्रतिष्ठायां अङ्कुरार्पणमेव च ।
× × × × × × × × ॥

End :

वासुदेवादिकुण्डानां अष्टोत्तरशताहुति. ।
वैष्णवान् भोजयेत्तत्र अष्टोत्तरशतं तथा ॥
× × × × × × × ।
प्राणप्रतिष्ठापनं च मूलमष्टाक्षरविद्यया ॥

Colophon :

इति श्रीपाञ्चरात्रे कपिञ्जलस + तासारे ध्वजस्तम्भप्रतिष्ठाविधानो नाम पञ्चदशोऽध्यायः ॥
पुण्याहम् । स्तपनम् । प्राणप्रतिष्ठा ॥

398

Sl. No 464`3 ध्वजस्तम्भस्थापनविधिः Ms. No. P. 5153/134

Beginning :

ध्वजोत्थानक्रमं वक्ष्ये समासादेव साम्प्रतम् ।
अन्तस्सारबहिस्सारा वृक्षजादि द्विधा स्मृता ॥
अन्तस्सारान् प्रवक्ष्यामि ध्वजाधारान् यथाविधि ।
क्रमुकं नारिकेळं च वेणुताळं तथैव च ॥

End :

एकाद्यनेकदरुजा द्रव्यैरायतपूर्वकैः ।
सद्दढां सूर्यसोनाग्निप्रभाढ्यां सुमनोरमात् ॥
स लोके शाश्वतीं कीर्तिं स्थापयित्वा कुलेरुह ।
स्थानं सायुज्यतापूर्वं देहान्ते नूनमाप्नुयात् ॥

Colophon :

इति श्रीपाञ्चरात्रे महोपनिषदि चित्रशिखण्डिसंहितायां ध्वजस्तम्भ-
स्थापनविधिर्नाम एकोनचत्वारिंशोऽध्यायः ।

399

Sl. No. 46491 ध्वजारोहणमङ्गलष्टकम् Ms. No. P. 215 : 3

Beginning :

सर्वेषां कृतिनां च मे तु गुरवः कैङ्कर्यनिष्ठा हरेः
श्रीरामानुजयोगिनायकमणिः श्रीपादपद्मालयाः ।
भोग्याष्टाक्षरमन्त्ररत्नचरमश्लोकानुसन्धायिनः
वन्द्या भागवतोत्तमाः प्रतिदिनं कुर्वन्तु ते मङ्गळम् ॥ १ ॥
× × × × × × × ।
× × × × × × × ॥

End :

अर्केन्दुः कुजसौम्यदेवगुरवः शुक्रश्च मन्दः क्रमात्
राहुः केतुरथाश्वनीमुखलसता × × रमो शान्विताः ।
एताभिः सहितैः ग्रहा नवहरेरंशांशुवेषोज्वलाः
प्रीत्यैकदशाः(?) समस्तफलदाः कुर्वन्तु ते मङ्गळम् ॥
× × × × × × × ॥
× × × × × × × ॥

Colophon :

× × × × × × × ×

400

Sl. No. 46504 **नित्यदेवतार्चनविधिः** Ms. No. C. 696/20

Beginning :

देवपूजाविधिं वक्ष्ये पुरुषसूक्तविधानतः ।
पादौ प्रक्षाल्य चाचम्य देवागारं प्रवेशयेत् ॥
+ + + + + + +
+ + + + + + + ॥
अपराधसहस्रेति श्लोकेन प्रार्थयेत्ततः ।
अपराधसहस्रभाजनं पतितं भीमभवार्णवोदरे ॥
अगतिं शरणागतिं हरे कृपया केवलमात्मसात्कुरु ।
× × × × × × × × ॥

इति संप्रार्थ्य—

End :

पूजां चैव न जानामि क्षम्यतां पुरुषोत्तम ।
अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ॥
दासोऽहमिति मत्वा क्षमस्व पुरुषोत्तम ।
कायेन वाचा नारायणा येति समर्पयामि ॥
+ + + + + + + ।
+ + + + + + + ॥

Colophon :

+ + + + +

401

Sl. No. 46508 **नित्यनैमित्तिकप्रायश्चित्तम्** Ms. No. P. 4907/20

Beginning :

श्रीभागवानुवाच—

प्रायो विनाश इत्युक्तं चित्तं सन्धानमुच्यते ।
विनाशस्य तु सन्धानं प्रायश्चित्तमिति स्मृतम् ॥
× × × × × × × × ।
नित्ये नैमित्तके चैव सर्वदोषनिकृन्तनम् ॥

End :

× × × मूर्तिहोम इति स्मृतम् ॥
कुम्भानुद्धृत्य विधिवत् सर्वेषां निष्कृतिर्भवेत् ।
अनुक्तानां तथाऽन्येषां गुणानामे × × चरेत् ॥

Colophon :

इति श्रीपाञ्चरात्रे परमपुरुषसंहितायां प्रायश्चित्तविधानं नाम एकोन-त्रिंशोऽध्यायः ॥

402

Sl. No. 46514 **नित्यनैमित्तिकमहोत्सवप्रायश्चित्तविधिः** Ms. No. P. 4981/8

Beginning :

विष्वक्सेनः—

अतः परं प्रवक्ष्यामि प्रायश्चित्तविधिं परम् ।
पूजनादिषु सर्वासु क्रियासु मुनिसत्तम ॥

प्रातः सन्ध्यार्चने हीने मध्याह्ने द्विगुणं चरेत् ।
प्रातर्मध्याह्नयो र्हीने सायाह्ने त्रिगुणं चरेत् ॥

End :

तद्ग्रामं निधनं याति तस्माच्छान्ति तु कारयेत् ।
शान्तिं कृत्वा विधानेन पञ्चरात्रेण पूजयेत् ॥
पूजालोपेऽपि चेत्तस्मिन् पुनस्तेनैव पूजयेत् ।
तस्मात्सर्वप्रयत्नेन क्षिप्रं शान्तिं समाचरेत् ॥

Colophon :

इति पाञ्चरात्रे विष्वक्सेनसंहितायां एकोनचत्वारिंशोऽध्यायेः ।

403

Sl. No. 46525 **नित्यार्चनघटिकाप्रमाणनिर्णयः** Ms. No. P. 10281/61

Beginning :

नित्यार्चने घटिकाप्रमाणम्—

घटिके द्वे भवेत्स्नानं तमेकार्चनं भवेत् ।
नृत्तं गेयं तथा वाद्यं तदर्धेन निवेदनम् ॥
होमश्चैवोत्सवो द्वे च शुद्धनृत्तावसानकं ।
प्रभातकालपूजायां स्नानादिविधिरीदृशः ॥

End :

कालभेदेषु सर्वेषु श्रेष्ठं कालत्रयं विदुः ।
प्रातर्मध्यन्दिनं रात्रिमुख्यं च कमलासन ॥

अवश्यं .... तेषु बलिर्नित्योत्सवावुभौ ।
होमपर्यन्तमन्यत्र कालभेदेषु शस्यते ॥

Colophon :

\+ + + + +

404

Sl. No. 46532 नित्योत्सवकालभेदनिर्णयः Ms. No. P. 5253/11

Beginning :

शाण्डिल्यः—

एवं कालत्रये कुर्यात् पूजनं मन्त्रवित्तमः ।
न च कालत्रयाभ्यूनं पूजनं विहितं सदा ॥
प्रासादेषु स्वयं व्यक्तं पूर्वेषु द्विजसत्तम ।
कालत्रयं प्रधानं स्यात् तदूर्ध्वं कर्तुरिच्छया ॥

End :

रात्रौ बिम्बे + वेषु कुर्यान्नीराजनं हरेः ।
राजोपचारं सकलं उपचारं प्रकल्पयेत् ॥
अह्नि रात्रौ च ये प्रोक्ताः कालभेदाश्चतुर्मुख ।
जघन्यमुख्यभेदेन तेस्विरथं हरिमर्चयेत् ॥

Colophon :

इति श्रीपाञ्चरात्रे महोपनिषदि श्रीब्रह्म तन्त्रे नित्योत्सवकालभेदः पञ्चमोऽध्यायः ।

405

Sl. No. 46534 **नित्योत्सवविधिः** Ms. No. P. 4984/87

Beginn ng :

श्रीभगवानुवाच—

आषाढे मासि सम्प्राप्ते शुक्ले पक्षे शुभे तिथौ ।
शयनं कारयेद्ब्रह्मन् मोक्षकामैरनुष्ठितम् ॥
तन्मासेऽधिके प्राप्ते सदोषस्तु न बाधते ।
देवोत्सवेषु सर्वेषु, पूर्वं सङ्कल्पमाचरेत् ॥

End :

अयने विषुवे चैव चन्द्रसूर्योपरागयोः ।
एवमादौ च सम्प्राप्ते नित्यनैमित्तिकं कुरु ॥
नैमित्तिकावसाने तु नित्यकर्म तु कारयेत् ।
एवमेव तु कर्तव्यं न दोषं विद्धि काश्यप ॥

Colophon :

इति सात्वतसंहितायाम् ।

406

Sl. No. 46548 **नित्योत्सवे-नैमित्तिकसम्भवनिर्णयः** Ms. No. P. 10281/52

Beginning :

नित्योत्सवे नैमित्तिकसम्भवविषयम् ।
नित्यनैमित्तिकप्राप्ते ह्येकस्मिन् समये तथा ।
पूर्वं नैमित्तिकं कृत्वा पश्चान्नित्यं समाचरेत् ॥

नैमि त्तकेह्यनित्येच नित्ये च युगपद्गते ।
प्रागनित्यं ततः पश्चान्नित्यनैमित्तिकं चरेत् ॥

End :

समाप्य पश्चाद्दैं कुर्यात्तानि कर्माणि सर्वदा ।
यदा नैमित्तिकाद्यं तु विभावाद्यैस्तु विस्तृतम् ॥
तदा तत्कालिकं नित्यं तत्कालात्प्राक् समाचरेत् ।
कालातिक्रमदोषस्तु तत्र न स्यात्कदाचन ॥

Colophon :

+ + + + +

407

Sl. No. 46551 निवेदनलक्षणम् **Ms. No. P. 10281/50**

Beginning :

निवेदनलक्षणम्—

निवेदयेद्यथा पूर्वं विशेषोऽत्र समीरितः ।
मन्त्रक्रियाविहीनं च गन्धदुष्टविवर्णकम् ॥
अतिपक्वमपक्वं च निस्रावितजलं तथा ।
अदीक्षितैश्च पतितैर्दीक्षित प्रतिलोमजैः ॥

End :

एवं दुष्टहविर्बुध्वा प्रक्षिपेज्जलमध्यतः ।
मोहात्स्वक्तहविर्विष्णोर्यदिदद्यात्तदर्चनम् ॥
निरर्थकं स्यात्कर्तॄणां विनाशं च भवेद्ध्रुवम् ।
तस्मात्तद्देवमूलस्य सहस्रं जपमाचरेत् ॥

Colophon :

× × × × × × ×

408

Sl. No 43560 नैमित्तिकस्नपनम् Ms. No. P. 3481/29

Beginning :

चन्द्रसूर्योपरागे च तत्काले स्नापयेत्प्रभुम् ।
सङ्क्रान्तिषु च सूर्यस्य प्राग्वत्पश्चाच्चथैव च ।।
सङ्क्रान्तिकालविज्ञानान्नाड्यः षोडशषोडश ।
तदानीं स्नापयेद्देवमतिक्रान्ते ह्युनेन्मनुम् ।।
+ + + + + + + ।
+ + + + + + + ।।

End :

सहस्रकृत्वस्तदनु तत्समं जपमाचरेत् ।।
पुरस्तात्सर्वकामार्थं अङ्कुरेष्वर्पितेष्वनु ।।
रक्तेषु श्यामवर्णेषु तथा तिर्यग्गतेषु च ।
यागेषु वा प्ररूढेषु दक्षिणाविमुखेषु च ।।
+ + + + + + +
प्रायश्चित्तेष्वनुक्तेषु एवमादिषु सत्सु च ।
मूलमन्त्रायुतं चैव जपेदष्टोत्तरं गुरुः ।।

Colophon :

× × × × ×

409

Sl. No. 46564 नैवेद्यदोषप्रायश्चित्तम् Ms. No. P. 4907/41

Beginning :

प्रायश्चित्तं प्रवक्ष्यामि कुत्सितैर्हविरादिभिः ।
कृमिकीटपतङ्गास्थिकेशदन्तनखत्वचः ॥
× × × × × × × × ।
मत्स्यमांसादिलोष्टं च शुष्ककाष्ठमषीतुषम् ॥

End :

क्षम्यतामिति चोच्चार्य दण्डवत् प्रणिपत्य च ।
एवमेव विधिं कृत्वा पश्चात्पूजां समाचरेत् ॥
इति महासनत्कुमारसंहितायाम् ॥

Colophon :

श्रीः

410

Sl. No. 46565 नैवेद्यद्रव्यान्तस्थभगवद्रूपविचारः Ms. No. P. 4001/11

Beginning :

अमृतं ब्राह्मणस्यान्नं क्षत्रियान्नं पयः स्मृतम् ।
वैश्यस्य चान्नमेवान्नं शूद्रान्नं रुधिरं स्मृतम् ॥
शूद्रान्नेनोदरस्थेन योधिगच्छति मैथुनम् ।
यस्यान्नं तस्य × × ते पुत्राः अन्नाच्छुक्लं प्रवर्तते ॥

End :

ततो रमादिदेवानां विष्णोः शेषं समर्पयेत् ।
संशोध्य च पुनः पृथ्वीं कृतकृत्यो भवेन्नरः ॥
ततो नीराजनं कृत्वा विष्णोरर्भूतकर्मणः(?) ।
ब्राह्मणान् भोजयेत् पश्चात् नित्यमेवं जनार्दनम् ॥

Colophon :

इति श्रीपाञ्चरात्रागमे पूजाकाण्डे शतोतरद्वादशोऽध्यायः ॥

411

Sl. No. 46574 | पञ्चकालाराधकनियमः | Ms. No. P. 10281/I

Beginning :

विशेषेण द्विषट्कर्णपूर्वैर्व्यापकपञ्चकैः ।
सदाराधननिष्ठानां पञ्चकालरतात्मनाम् ॥
प्राणिहिंसा न कर्तव्या द्रुमविच्छेदनं तथा ।
नदीकेदारकूलानां भेदनं सस्यशोषणम् ॥

End :

देवतायतानादीनां पीडनं तन्निवासिनाम् ।
वापीकूपतटाकानां पूरणं मृच्छिलादिभिः ॥
सम्भाषणं तथा तेभ्यो मात्रावित्तपरिग्रहम् ।
तस्मिन् काले विशेषेण वर्जयेद्बुद्धिमान्नरः ॥
य एवं कुरुते तस्य प्रायश्चित्तेन निष्कृतिः
+ + + + + + + +॥

Colophon :

× × × × × × × ×।

412

Sl. No. 46579 **पञ्चमहापातकप्रायश्चित्तविधिः** Ms. No. P. 4984/28

Beginning :

अनुकल्पे तदर्धं तु दद्याद्भागवतो विभो: ।
अर्धं दद्याद्ब्राह्मणेभ्य: तुलाभारे तथैव च ॥
× × × × × × × ×।
× × × × × × × ×॥
तुलाभारोह्ययं कर्म तुलाभारदाचरेत् ।
हेमनिष्कसहस्रं वै दद्याद्वै गुरुदक्षिणाम् ॥
+ + + + +

End :

अप्रकाशे प्रकाशे वा कामतोऽकामतोऽपि वा
जपान्ते यागहोमौ च कृत्वा शुध्यति नान्यथा ॥
दीक्षोपकरणादीनामभावाद्द्विजसत्तम ।
सर्वाङ्गनाप्रसक्तश्च लक्षजापश्च शुध्यति ॥
× × × × × × ×।
× × × × × × ×॥

Colophon :

– – – – –

413

Sl. No. 46580 **पञ्चरात्रप्रभावः** Ms. No. P. 10281/46

Beginning :

पञ्चरात्रप्रभावः—

पञ्चरात्रात्परं शास्त्रं न भूतो न भविष्यति ।
ब्राह्मणः सर्ववर्णेषु आश्रमेणोत्तमो यतिः ॥

× × × × × × × ।
× × × × × × × ॥

यथा सरिद्वरा गङ्गा देवानामच्युतो यथा ।
एवं सर्वेषु शास्त्रेषु पञ्चरात्रं प्रशस्यते ॥

\+ + + + + + +

End :

स्वयं भगवतो विष्णोर्मुखाम्बुजविनिर्गतम् ।
पञ्चरात्राख्यममृतं पुण्यं प.पविनाशनम् ॥

यथा सर्वेषु देवेषु परो नारायणः स्मृतः ।
पञ्चरात्रोक्तविधिना योर्चयेत्पुरुषोत्तमम् ॥

× × × × × × × ।
× × × × × × × ॥

तस्य सांसारिकं दुःखं न भवेन्नात्र संशयः ।
× × × × × × × ॥

Colophon :

× × × × × × ×

414

Sl. No. 46581 पञ्चवस्त्रनिर्णयः Ms. No. P. 10281/94

Beginning :

पञ्चवस्त्रम्

पञ्चवस्त्राणि चाच्छाद्य विग्रहोपरि यः क्रमात् ।
रोमजं चर्मजं चापि मण्डज चाण्डजं तथा ।।

वामज चेति विख्यातः पञ्चशय्याः प्रकीर्तिताः ।
रोमजं चाविकानां तु कृतं यद्रोमजं भवत् ।।

\+ + + + + + + ।
\+ + + + + + + + ।।

End :

अश्वमेधसहस्राणि वाजेपयशतानि च ।
गङ्गास्नानफलं प्राप्य विष्णुसायुज्यमाप्नुयात् ।

\+ + + + + + + + ।
\+ + + + + + + + ।।

आयुरैश्वर्यपुत्रादीन् सर्वान् कामानवाप्नुयात् ।
इह लोके सुखं लब्ध्वा परलोके तथैव च ।।

× × × × × × × × ।
राज्यलक्ष्मीवरं प्राप्य पुनः प्राज्ञो भविष्यति ।।

Colophon :

\+ + + + + + + +

415

Sl. No. 46586 पञ्चसंस्कारविधिः Ms. No. P. 2380/12

Beginning :

अथ पञ्चसंस्काराः—श्रीपाञ्चरात्रे—

प्रसन्नकुलसंभूताः देवतान्तरदूरगाः ।
होमादिकं विना कार्यं तेषां तापादिपञ्चकम् ॥

यद्दृष्ट्वा वैष्णवश्चेति भवेन्निस्संशयं मुने ।
तादृशं लक्षणं वक्ष्ये वैष्णवानां विशेषतः ॥

End :

तस्मादवश्यं कर्तव्यं वैष्णवस्य तु लक्षणम् ।
वैष्णवो वैष्णवं दृष्ट्वा दण्डवत्प्रणमेद्भुवि ॥

तयोर्मध्यगतो विष्णुः शङ्खचक्रगदाधरः ।
न परीक्ष्य वयोवन्द्याः नारायणपरायणाः ॥

Colophoh :

\+ \+ \+ \+ \+

416

Sl. No. 46599 पञ्चोपनिषन्मन्त्रविवरणम् Ms. No. P. 1397/31

Beginning :

पञ्चोपनिषन्मन्त्रवर्णरूपस्थानन्यासक्रमः—

लकारं पृथिवीबीजं मिश्रं पञ्चगुणं तथा ।
तद्वर्णं पाटलनिभं मूर्ध्निमध्ये तु विन्यसेत् ॥

End :

रकारमग्निबीजं च पकारं वरुणं तथा ।
पकाररूपमाकाशं क्रमात् ज्ञात्वा मुनीश्वर ॥

Colophon :

इति प्रपञ्चसारे पञ्चोपनिषन्मन्त्रविवरणं समाप्तम् ।

417

Sl. No. 46602 **पद्माक्षतुलसीमालाप्रतिष्ठाविधिः** Ms. No P. 1722/5

Beginning :

तत. पद्माक्षतुलसीमालिकां धारयेद्बले ।
श्रीमत्पवित्रमतुलं देवदेवेन धारितम् ॥
तयोरुपरिसन्धार्यं सर्वपापप्रणाशनम् ।
पद्माक्षमालिका धार्या सततं ब्रह्मवादिभिः ॥
प्रतिष्ठिता विधानेन तुलसीमालिकापि च ।
पद्माक्षमालिकां गृह्यमूलमन्त्रेण मार्जयेत् ॥

End :

तप्तचक्रादिचिह्नैस्तु चिह्नितो द्विजसत्तमः ।
पद्माक्षतुलसीमालां पवित्रं च यथाक्रमम् ॥
सन्धार्य विष्णोः प्रीत्यर्थं श्रीशस्य जगतीपतेः ।
नित्यकर्माणि कुर्वीत तथा नैमित्तिकान्यपि ॥

Colophon :

इति वासिष्ठसंहितायां पद्माक्षतुलसीप्रतिष्ठाक्रमः ।

418

Sl. No. 4 612 परशुरामकल्पसूत्रम् Ms. No. C. 1978

Beginning :

अथातो दीक्षां व्याख्यास्याम: परमशिवभट्टारक: श्रुत्याद्यष्टादशविद्या: सर्वाणि दर्शनानि लीलया तत्तदवस्थापन्न: प्रणीय सविमत्या भगवत्या स्वात्माभिनयाष्ट + + + + + ॥

End :

+ + + + + + +

इमां दशखण्डीं महोपनिषदं महात्रैपुरसिद्धान्तसर्वस्वभूतामधीते सर्वेषु यज्ञेषु यष्टा भवति यं यं क्रतुमधीते न तेनास्येष्टं भवति ह्येतत्सत्यमुपनिषदिति शिवम् ॥

Colophon :

इति परशुरामीयं कल्पसूत्रं समाप्तम् ।

419

Sl. No. 46623 पवित्रारोपणम् Ms. No. P. 5253/79

Beginning :

नारद: —

अखण्डनाय नित्यस्य तथा नैमित्तिकस्य च ।
कर्मणश्चोदयामास हलीविष्णुर्मुनीश्वरा: ॥

सङ्कर्षण: —

यैराजीवाधिकं कालं नित्यमाराधनं प्रति ।
धी: कृता पुण्डरीकाक्ष श्रद्धापूतेन चेतसा ॥

End :

नो याति म्लानतां यावत् चतुर्थेनाह्नि वा त्यजेत् ।
विशेषयागपूर्वं तु कारिभ्योवासरे स्वके ॥

एवं कृते सति सदा सिद्धिर्भवति शाश्वती ।
तत्सर्वाराधकानां तु चेतसाऽभीप्सितं तथा ॥

Colophon :

इति श्रीसात्वतसंहितायां पवित्रारोपणविधिर्नाम चतुर्दशः परिच्छेदः ॥

420

Sl. No. 46624 **पवित्रारोपणम्** **Ms. No. P 4803/1**

Beginning :

अतः परं प्रवक्ष्यामि पवित्रारोपणं परम् ।
सर्वपापप्रशमनं सर्वकामफलप्रदम् ॥
विभूतिसकलं सिद्धिं धनधान्यसमृद्धिदम् ।
कामानवाप्नुयात् कामी पुत्रार्थी लभते सुतम् ॥

End :

सामीप्यं चैव सालोक्यं सायुज्यं तु न संशयः
तस्माच्छ्रेष्ठमिदं विद्धि पवित्रारोपणं मुने ॥
+ + + + + + + ।
इति संक्षेपतः प्रोक्तं पवित्रारोपणं हरेः ॥

Colophon :

इति श्रीपञ्चरात्रे महोपनिषदि दूर्वाससंहितायां पवित्रारोपणविधानो नाम चतुस्त्रिंशोऽध्यायः ॥

421

Sl No. 46643 पाञ्चरात्राधिक्यम् Ms. No. P. 1397/20

Beginning :

पाञ्चरात्रमहाम्भोधिं विगाह्य गुरुशिक्षया ।
सात्त्विकोक्तप्रकारेण वक्ष्ये शास्त्रस्य निर्णयम् ॥

वेदमूलं पञ्चरात्रं साक्षाद्विष्णुमुखाश्रयम् ।
तस्य मध्ये द्विधा प्रोक्तं सात्वता सात्वतं स्मृतम् ।

End :

सर्वदेवाधिकं विष्णुः अधिकं विष्णुपूजनम् ।
शास्त्राणामधिकं पुण्यं पञ्चरात्रमहार्णवम् ॥

Colophon :

इति श्रीपाञ्चरात्राधिक्यं समाप्तम् ।

422

Sl. No. 46646 पाञ्चरात्रोत्पत्तिः Ms. No. P. 1669/78

Beginning :

श्रियः पतिः ब्रह्मवसिष्ठशक्ति-
पराशरव्यासशुकप्रसूताः
शुकप्रसादात् कमले प्रसूताः
मनोभवाश्चाष्पशतांशुपुत्राः

× × × × × × ×
× × × × × × × ।

एतन्नरशुकमानसोद्भव-
सरोजातस्य पुत्रोद्भवा: ।।

End :

ताण्ड्यायनश्शौनकश्च आपस्तम्बादयस्तथा ।
एते आचार्यनिष्ठा वै वेदमार्गप्रवर्तका: ।।
× × × × × × × ।
तस्मै त्वमेवमाचार्य: नित्यं कुरु चतुर्मुख ।

Colophon :

इति श्रीपाञ्चरात्रे विष्णुतन्त्रे श्रीमहाभागवते विष्णुवाक्ये सृजित-संक्षेपपञ्चरात्रोत्पत्तिविधानं नाम प्रथमोऽध्याय: ।

423

Sl. No. 46647 पाञ्चरात्रोत्पत्ति: Ms. No. P. 2151/20

Beginning :

श्रिय: पतिर्ब्रह्मवसिष्ठशक्ति-
पराशरव्यासशुका: प्रसूता:
शुकप्रसादा कमले प्रसूता:
मनोभवाश्चाष्टशतश्च पुत्रा: ।।
+ + + + +

श्रीभगवानुवाच—

अष्टोत्तरशतार्याणां अयोनिपद्मसम्भवा: ।
तसद्मान्दिरा चैव चरेसद्मसरोरुहे ।।

End :

एतदाचार्यनिष्ठो वै वेदमार्गप्रवर्तकाः ।
तस्मात्त्वमेवमाचार्यनीत्यं (?) कुरु चतुर्मुख ॥

Colophon :

इति श्रीपाञ्चरात्रे विष्णुतन्त्रे श्रीमहाभागवते विष्णुवाक्ये श्रृजतं (?) ब्रह्मशुकयोगिनां सङ्क्षेपपाञ्चरात्रोत्पत्तिविधानो नाम प्रथमोऽध्यायः ।

424

Sl. No. 46649 पाणिग्रहणमहोत्सवविधिः Ms. No. P. 1669/31

Beginning :

अत्रिर्भृगुर्वसिष्ठश्च जमदग्निस्तथैव च ।
विवाहार्थं ऋषीन् प्रार्थ्य धूर्तो गोपालवेषधृक् ॥

नानाफलसमायुक्तं नूतनैर्वस्त्रसंयुतम् ।
निश्चिताम्बूलद्रव्याणि शुभद्रव्याणि कारयेत् ॥

× × × × × × × ।
× × × × × × × ॥

End :

मूलमन्त्रेण समिधाज्यं हावयेत् । नीराजनमाशीर्वादं कृत्वा-ब्राह्मणान् संतर्प्य आचार्याय गोभूहिरण्यादिभिः पूजयेत् ॥

Colophon :

इति क्रियाकलापे कपिञ्जलपाञ्चसारे पाणिग्रहणविधानं नाम पञ्चमोऽध्यायः ।

425

Sl. No. 46656 **पाद्मसंहिता** Ms. No. P. 4196

Beginning

शुक्लाम्बर × शान्तये ॥ ज्ञानानन्द × × उपास्महे ॥
आसीनमाश्रमे कण्वं तदाश्रमनिवासिनः
निश्रेयसकरं कर्म प्रष्टमारेभिरे मुनिम् ॥

× × × × × × चुः—
आधीताः कण्व भगवन् साङ्गोपाङ्गास्सविस्तराः ।
देवत्वत्तस्समस्तानि शास्त्राणि च यथा तथम् ॥

× × × × × × × ।
× × × × × × × ॥

एतेषु तदधीतेषु कैवल्यायैव कल्पते ।
× × × णन्तदपि त्वत्तः श्रोतव्यं नान्यथा गतिः ॥

× × × × × × × ।
× × × × × × × ॥

End :

अग्निप्रकाररूपास्ते न शक्या प्रेक्षितुं परैः ।
प्रवेशनं पुनर्ब्रह्माश्चक्रविद्या प्रवाहतः ।
यत्र यत्र भयं पुसः तत्र तत्राभयं भवेत् ॥

Colophon :

इति श्रीपाञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे चार्यपादे किरीट × × × मन्त्रोद्धारो नाम एकत्रिंशोऽध्यायः ।

426

Sl No. 46662 **पारमेश्वरसंहिता** Ms. No. P. 2369

Beginning :

नमस्सकलकल्याणदायिने चक्रपाणये ।
विषयार्णवमग्नानां समुद्धरणहेतवे ॥
तोताद्रिशिखरक्षेत्रे सर्वक्षेत्रेषु पूजिते ।
पुण्यतीर्थसमायुक्ते दरीप्रस्रवणान्विते ॥
नानावृक्षसमायुक्ते ननापुष्पलताकुले ।
नानामृगसमाकीर्णे नानापक्षिसमाकुले ॥

End :

भावभक्तिसमेतानां वाच्यवाचकयोर्गुरौ ।
शास्त्रे ज्ञानक्रियापादे सात्त्विके देवनिर्मिते ॥
× × × × × × × × ।
आस्तिक्यं जायते येषां तेषामेतत् प्रकाशय ॥ ५० ॥

Colophon :

इति श्रीपाञ्चरात्रे महोपनिषदि पारमेश्वरे क्रियाकाण्डे सुदर्शनमहायन्त्रार्चने वह्निकार्यविधिर्नाम षड्विंशोऽध्यायः ।

427

Sl. No. 46664 **पिञ्छलक्षणविधिः** Ms. No. P. 5253/139

Beginning :

शिबिकालक्षणं प्रोक्तं पिञ्छिलक्षणमुच्यते ।
पिञ्छिलक्षण × वक्ष्ये समासाच्छृणु नारद ॥

पूर्ववद्दारुसङ्गृह्य शिल्पिना कुशलेन च ।
शिबिकाकारवत् कुर्यात् सप्तहस्तसमन्वितम् ॥

End :

चतुरग्रामसंयुक्तं चतुस्सम्भेन शोभितम् ।
कलातपट्टिकायुक्तं चतुश्चक्रसमन्वितम् ॥
नानावस्त्रैरलङ्कृत्य
घण्टामाल्यैरलङ्कृतम्
द्वितीये दिवसे प्राप्ते
देवमारोपयेत्ततः ॥

Colophon :

इति पिञ्चक्षणविधिः ।

428

Sl. No. 46669 पुराणविधानम् Ms.No. P. 1669, 60

Beginning :

पुराणस्य विधिं वक्ष्ये द्रव्याणां च विशेषतः ।
संक्रान्त्यां ग्रहणेवाऽपि अयने च स्वजन्मनि ॥
श्रवणेषु च पञ्चम्यां द्वादश्यां पर्वयोस्तथा ।
पुराणं पूजायेत्काले उक्तद्रव्येण देशिकः ॥

End :

तस्मात्सर्वप्रयत्नेन पुराणं कारयेद्द्विजः ।
वर्षेवर्षे तु कर्तव्यं साधकैस्सिद्धिकाङ्क्षिभिः ॥

Colophon :

इति श्रीपाञ्चरात्रे कपिञ्जलसंहितायां पुराणविधानं नाम एकविंशोऽध्यायः ।

429

Sl. No 46672 पुष्पयागमहोत्सवविधिः Ms. No.P. 2151/14

Beginning :

दशमेऽहनि तद्रात्रौ पुष्पयागमथाचरेत् ।
देवमुत्सवविम्बस्थं यानमारोप्य देशिकः ॥
आस्थानमण्टपं नीत्वा सौवर्णे भद्रविष्टरे ।
× × × × × × ×॥

End :

ग्रामे वर्ग(?)णरे देशे वर्तमाने महोत्सवम् + +
+ + भवन्ति सुखिनस्सर्वे सर्वदुःखविवर्जिताः ॥
× × × × × × ×।
× × × × × × ×॥
महोत्सवे वर्तमाने यद्यदिभ्यप्रदीयते ।
पानीयमन्नं वस्त्रं वा तत्सहस्रगुणं भवेत् ॥
+ + + + + + +।
इति गुह्यतमं ब्रह्मन् उत्तमाराधनं परम् ॥

Colophon :

इति श्रीपाञ्चरात्रे महोपनिषदि पाद्मतन्त्रे आचार्यपादे महोत्सवविधानं नाम विंशोऽध्यायः ॥

430

Sl. No. 46674 **पुष्पयागविधिः** Ms. No. P. 5253/3

Beginning :

पुष्पयागविधिं वक्ष्ये समासान्मुनिपुङ्गव ।
ध्वजारोहरणतीर्थान्ते प्रायश्चित्तं तु यद्भवेत् ॥
उक्तदोषविघातार्थं पुष्पयागं च कारयेत् ।
प्रासादस्याग्रतः कुर्यात् दक्षिणे पश्चिमे तु वा ॥

End :

आचार्यं पूजयेद्विद्वान् स्वर्णहेमाङ्गुलीयकैः ।
वैष्णवानां विशेषेण यथाशक्ति तु दक्षिणाम् ॥
आचण्डलान्तमन्ताद्यैः पूजयित्वा महाध्वरे ।
इति संक्षेपतः प्रोक्तो वैष्णवो योग उत्तमः ॥

Colophon :

इति श्रीपाञ्चरात्रे पुष्पयागविधिर्नाम चतुर्विंशोऽध्यायः ।

431

Sl. No. 46682 **पूजाकालविधिः** Ms. No. P. 5253/172

Beginning :

ब्रह्मसंहितायां —

धनुरास्यगते सूर्ये विष्णोरायतने शुभे ।
प्रातः पूजा च कर्तव्या मध्याह्ने नैवकारयेत् ॥

नारायणसंहितायाम्—

मार्गशीर्षे सिते पक्षे धनुस्सङ्क्रमणं यदि ।
तदा पूजा तु कर्तव्या प्रातरेव न चान्यथा ॥

End :

कार्मुकस्थे रवौ विप्राः नित्यनैमित्तिकाः क्रियाः ।
कृत्वा प्रभातवेलायां देवतार्चनमाचरेत् ॥
द्वादश्यां तु हरेः पूजा विहिता देवतादिभिः ।
तथैव कृत्वा पूजादीन् स्वयं भोजनमाचरेत् ॥

Colophon :

हरिः ओम् ॥

432

Sl No 46683 **पूजाफलनिर्णयः** Ms. No. P. 10281,98

Beginning :

पूजाफलम् —

सूर्यस्य पूजया नित्यं ग्रहपीडा न जायते ।
सुब्रह्मण्यो विशेषेण सबलां न हि तद्भवेत् ॥
वास्तुसम्पूजयादेवरक्षां तु ग्रहवाहनः ।
नित्यं कुर्यात्प्रजावृद्धि भक्त्या सम्पूजितो हरिः ॥

End :

ज्ञानप्रदं च सर्वेषामिष्टय्याप्ति विशेषतः ।
भुक्तिमुक्तिप्रदं तेषां बिष्णुपूजा विशेषतः ॥

सर्वकामप्रदं तेषां सर्वेषां कर्म कर्मणाम् ।
तस्मादेव ततः कुर्यात्पूजा नित्यं मनस्विना ॥

Colophon :

\+ + + + +

433

Sl. No. 46684 **पूजालोपप्रायश्चित्तम्** Ms. No. P. 3481/27

Beginning :

पूजालोपे प्रवक्ष्यामि प्रायश्चित्तं मुने शृणु ।
औपचारिकसंस्पर्शहृदयङ्गमरूपिणाम् ॥
परिच्युतौ च भंगानां त्रयणां क्रमशो मुने ।
पूजान्ते सर्वबीजानि मात्राविंत व्रृतोदनम् ॥
\+ + + + + + + ।
निवेदनीयं देवस्य विशेषाज्यपुरस्सरम् ॥

End :

\+ + + + +
मूलबिम्बादि बिम्बानां कुर्याद्वापि निवेदनम् ।
बहुबेरेऽभिषेकार्चां तां गृहीत्वाग्र ?)मणपात् ॥
न गच्छेद्द्वाह्यते मन्त्री स्नपनार्थं बहिष्कृते ।
शान्तिहोमं प्रकुर्वीत तस्य दोषस्य शान्तये ॥

Colophon :

\+ + + + + + + +

434

Sl. No. 46685 **पूजालोपप्रायश्चित्तम्** Ms. No. P. 1397/3

Beginning :

अथातः संप्रवक्ष्यामि प्रायश्चित्तविधिं परम् ।
प्रायो विनाश इत्युक्तं चित्तं सन्धानमेव तत् ॥
विनाशास्यानुसन्धानं प्रायश्चित्तमितीरितम् ।
प्रातः कालेऽर्चने हीने मध्याह्ने द्विगुणं चरेत् ॥

End :

अधमोत्तममेतत्तु स्नपनं परिकीर्तितम् ।
देशिकं यानमारोप्य स्वगृहे सन्निवेशयेत् ॥
+ + + + + + + + ।
सर्वान् कामानवाप्नोति नात्र कार्या विचारणा ॥

Colophon :

इति श्रीपाञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे चर्यापादे अष्टमोऽध्यायः ॥

435

Sl. No. 46697 **प्रतिमालक्षणम्** Ms. No. P. 1669/45

Beginning :

गौतमः —

त्वत्प्रसादान्मुनिश्रेष्ठ श्रुतं सर्वं मयाऽधुना ।
इदानीं सर्वमूर्तीनां लक्षणं ध्यानमेव च ॥

× × × × × × ×।
स्थानेचैवासने चैव शयने यानके तथा ॥

End :

ऋष्यादिपूजिते स्थाने कल्पादौ यत्कथा यथा ।
तथा तत्रैव कर्तव्यं अन्यथा विफलं भवेत् ॥
× × × × × × × ×।
तस्मात्सर्वप्रयत्नेन परिक्ष्यैव समाचरेत् ॥

Colophon :

इति श्रीपाञ्चरात्रे नारदीयसंहितायां प्रतिमालक्षणं नाम त्रयोदशोऽध्यायः–

436

Sl. No. 46703 **प्रतिष्ठानवखण्डः** Ms. No. P. 1397/45

Beginning :

श्रीवेङ्कटेश्वरं नत्वा
दारुलोहशिलादिभिः
कृतबिम्बस्य वक्ष्येऽहं
प्रतिष्ठां पाद्ममार्गतः ॥
अथादावङ्कुरारोपणं रात्रौ
कृत्वा प्रातःकाले बिम्बानां ।
+ + + + + + +।
धान्यराशौ नयनोद्घाटनं कृत्वा ॥

End :

यजमानश्च मूर्तिपान् सुवर्णकुसुमैः प्रपूज्य यथेप्सितधनादिकान् दद्यात् ।
आचार्यं यानमारोप्य स्वगृहं सन्निवेशयेत् ।

Colophon :

इति प्रतिष्ठानवखण्डः समाप्तः ॥

437

Sl. No. 46705 प्रतिष्ठाप्रायश्चित्तम् Ms. No.P. 3481/32

Beginning :

प्रतिष्ठायां प्रवक्ष्यामि प्रायश्चित्तं यथाक्रमम् ।
शिलादारुसधालोहपूर्वाणां तु परिग्रहे ॥

तत्तदङ्गं यथोदीर्णं द्रव्यमन्त्रक्रियादिषु ।
परिच्युतेषु तद्भूयः शान्तिहोमपुरस्सरम् ॥

End :

बिम्बं वै पूर्ववत्पश्चात्प्रतिष्ठास्थापनोक्तवत् ।
परिवाराङ्गवैकल्ये पुनस्सन्धानमाचरेत् ॥

तत्तन्मन्त्रेण मतिमान् समिद्भिः सर्पिषाहुतिः ।
चरुणा जुहुयाद्धीमान् प्रत्येकं तु शताधिकैः ॥

सम्प्रोक्ष्याभ्यार्च्यमन्त्रज्ञः पुण्याहं वाचयेत्ततः ।
× × × × × × × ॥

शङ्खचक्रधरं देवं किरीटादिविभूषितम् ।
सत्यज्ञानमयं देवं हंसासन्नहरिं भजेत् ॥

Colophon :

इति पराशरसंहितायम् ।

438

Sl. No. 46706 **प्रतिष्टार्चनादिकालनियमाः** Ms No. P. 1669/46

Beginning :

अन्यद्बिमानकाष्ठादि तच्छिलां तु चेष्टिकाः ।
तद्बिम्बादिश्च पात्राणि तत्र चामरपिञ्छकैः ॥

× × × × × × × ।
यो मोहात्कुरुते तस्मिन् राजा राष्ट्रं विनश्यति ॥

End :

यज्ञमध्ये क्रियामध्ये दीक्षामध्ये महोत्सवे ।
कर्मणां सूतके प्राप्ते तस्य नास्ति च सूतकम् ॥

Colophon :

+ + + + +

439

Sl· No 46708 **प्रतिष्ठानिर्णयः** Ms· No P 1669/80

Beginning :

चातुर्मास्यादि सुप्तान्तं अन्त्रिके त्रिषुचाचरेत् ।
तथापि कृष्णपक्षे तु निन्दितेमासि पद्मज ॥

शौनकः —

उत्तरायणगे भानौ दक्षिणायनगेऽपिवा ।
द्विविधं स्थापनं चैव स्थावरं जंगमं शुभम् ॥

End :

दशमीपौर्णमासी च सप्तमी च विशेषतः ।
एकादशी तृतीया च शुक्लपक्षे शुभा इमाः ॥
× × × × × × × ×।
इति सम्यक् समाख्यातं ऋक्षवारं द्विजोत्तमाः ॥

Colophon :

इति श्रीपाञ्चरात्रे कपिञ्जलसंहितायां नक्षत्रदिवसविधिर्नाम पञ्चमोऽध्यायः–

440

Sl. No. 46710 प्रतिष्ठाविधिः Ms.No. P. 1669/5

Beginning :

काश्यप. —
प्रतिष्ठालक्षणं ब्रूहि जलवासं द्विजोत्तम ।
तत्सर्वं विस्तरेणैव यदि×तुष्टोऽसि मे प्रभो ॥
कपिञ्जल :—
× × × × × × × × ।
अथ वक्ष्यामि विप्रेन्द्र प्रतिष्ठाविधिमुत्तमम् ॥

End :

तदनन्तरं स्नपनं कारयेत् सवत्सां गां निरीक्षयेत् । तदाप्रभृति नित्यपूजां समाचरेत् । प्रतिष्ठान्ते उत्सवं कार्यम् ॥

[आगमं बाहलं शिल्पं ज्यौतिषं बाहट तथा
उपदेशेन कर्तव्यं शब्दार्थं न विचारयेत् ॥]

Colophon :

इति श्रीपाञ्चरात्रे प्रतिष्ठातन्त्रे क्रियाकलापो नाम पञ्चमोऽध्यायः ॥

441

Sl. No. 46723 प्रभातकालेऽन्यदर्शनदोषनिर्णयः Ms No. P. 10231/78

Beginning :

प्रभातकालेऽन्यदर्शनदोषः –

कवाटोद्घाटनं कुर्यात्स्वार्चदेचक्तस्वयम् ।
मन्त्रमुच्चार्य मुद्रां च दर्शयन् देवसन्निधौ ॥

अन्येन न प्रवेष्टव्यं सन्निधिं चार्चकं विना ।
अर्चकं पुरतः कृत्वा प्रवेष्टव्यं सदेतरै ॥

\+ + + + +

End :

मन्त्राधीनो भवेद्देवो बिम्बेदितरदर्शनात् ।
यथारहो सुधांशुश्च ताक्ष्यादहिकुलं यथा ॥

मृगेन्द्रादिवनागांश्च वह्विराजभिर्यथा तथा ।
तस्मादर्चकमूलानि सर्वकर्माणि कारयेत् ॥

\+ + + + + + + ।
\+ + + + + + + ॥

Colophon :

\+ + + + +

442

Sl No. 46731 **प्रायश्चित्तविधानम्** Ms. No. P. 4907/37

Beginning :

प्रायश्चित्तं प्रवक्ष्यामि शृणुष्व कमलोद्भव ।
ब्रह्महा गुरुतल्पश्च सुरापश्चापि यो नरः ॥
× × × × × × × ।
हर्मस्तेयी च चत्वारः महापातकिनः स्मृताः ॥

End :

शान्तिहोमो जपश्चैव यथा पूर्ववदिष्यते ।
द्विजानां भोजनं चैव सर्वदोषप्रशान्तये ॥

Colophon :

॥ श्रीः ॥

443

Sl. No. 46732 **प्रायश्चित्तविधानम्** Ms. No. P. 4907/11

Beginning :

ब्रह्मा....अतःपरं प्रवक्ष्यामि प्रायश्चित्तविधिक्रमम् ।
प्रायो विनाश इत्युक्तं चित्तं सन्धानमुच्यते ॥
+ + + + + + + ।
विनाशस्य .... स्मृतम् ॥

End :

गलभागसमायुक्तं नानालङ्कारशोभितम् ।
अन्यमानं न कर्तव्यं कर्तव्यं लक्षणान्वितम् ॥

Colophon :

इति श्रीपाञ्चरात्रे वासिष्ठसंहितायां प्रायश्चित्तविधिर्नाम त्रयोदशः पटलः—

444

Sl. No. 46733 प्रायश्चित्तविधानम् Ms. No. P. 4907/33

Beginning :

भगवन् श्रोतुमिच्छामि प्रायश्चित्तविधिं परम् ।
विस्तरेण सुरश्रेष्ठ वक्तुमर्हसि सुव्रत ॥
× × × × × × × ।
श्रीविष्णुः—अथातः सम्प्रवक्ष्यामि प्रायश्चित्तविधिं परम् ॥

End :

अर्चयेद्देवदेवेशं महाहविर्निवेदयेत् ।
ब्राह्मणान् भोजयेत्पश्चात् यथाशक्ति च दक्षिणाम् ॥

Colophon :

इति विष्णुतन्त्रे प्रायश्चित्तम् ।

445

Sl. No. 46734 प्रायश्चित्तविधानम् Ms No. P. 4907/16

Beginning :

काश्यपः—

भगवन् श्रोतुमिच्छामि प्रायश्चित्तविधिक्रमम् ।
विस्तरेण द्विजश्रेष्ठ वक्तुमर्हसि सुव्रत ॥

कपिञ्जलः—

× × × × × × × ।

अथ वक्ष्ये मुनिश्रेष्ठ प्रायश्चित्तविधिक्रमम् ॥

End :

एवं यस्तु विधानेन प्रायश्चित्तं समाचरेत् ।

स याति ब्रह्मसायुज्यं सर्वान् कामानवाप्स्यति ॥

× × × × × × × ।

इति संक्षेपतः प्रोक्तं प्रायश्चित्तं हरेश्शुभम् ॥

Colophon :

इति श्रीपाञ्चरात्रे कपिञ्जलसंहितायां प्रायश्चित्तविधानं नाम एकत्रिंशोऽध्यायः—

445

Sl. No. 46735 प्रायश्चित्तविधानम् Ms. No. P. 4907/19

Beginning :

नारदः —

भगवन् श्रोतुमिच्छामि प्रायश्चित्तविनिर्णयम् ।

कृताकृतानां सर्वेषां शान्तये वैष्णवस्य च ॥

श्रीभगवानुवाच—

× × × × × × × × ।

मार्गस्थो मुनिशार्दूललुप्ताचारो व्रज × × ॥

End :

सर्वनाशात्तु यद्येकामन्त्रांशः प्राप्यते पुनः ।

संस्कृत्य प्राप्य भुङ्क्त्वा च जप्त्वा मन्त्रं तदा हरेत् ॥

Colophon :

इति श्रीपाञ्चरात्रे जयाख्यसंहितायां साधकप्रायश्चित्तं नाम पञ्चविंशः पटलः—

447

Sl. No. 46746 प्रायश्चित्तशान्तिहोमविधिः Ms. No P. 4977/15

Beginning :

नैमित्तिकानां काम्यानां कर्मणां भगवन् हरे ।
आराधनानां वैकल्ये लोपे वा प्रायसंज्ञितम् ॥
तस्य चित्तसमाधानमिति निर्वचनक्रिया ।
× × × × × × × ॥

End :

एवं कृत्वा विधानेन शान्तिहोमं विचक्षणः ।
सर्वान् कामानवाप्नोति यत्कर्मफलसिद्धदम् ॥

Colophon :

इति पाञ्चरात्रे मूलसंहितायां अङ्कुरार्पणप्रकरणे शान्तिहोमविधिस्समाप्तः ।

448

Sl. No. 46748 प्रायश्चित्तहिरण्यगर्भविधिः **Ms. No. P. 4907/45**

Beginning:

शाण्डिल्यः—

मुने हिरण्यगर्भादौ विशेषो वक्ष्यतेऽधुना ।
हेम × × विधानन्तु विभवाद्यनुसारतः ॥

+ + + + + + + ।

प्राग(?)मण्डपनिर्माणं पीठादिपरिकल्पनम् ॥

End :

विशेषार्चनसंयुक्तं ततोऽन्यस्मिन् दिने तु वा ।
एवं सर्वत्र वै कुर्यात् विसर्जनविधिं द्विज ॥

Colophon :

इति श्रीपाञ्चरात्रे पारमेश्वरे क्रियाकाण्डे प्रायश्चित्तहिरण्यगर्भविधिर्नामैक-
विंशोऽध्याय —

449

Sl. No. 46751 प्लवोत्सवविधानम् Ms. No. P. 5253/34

Beginning :

ब्रह्मोवाच —

देवदेवामरैः सर्वैः न तवावसरोन्वहम् ।
निरूपितास्त्वपूर्वं वै विविधास्सकलोत्सवाः ॥

तथापि श्रोतुमिच्छामि
कासारे च प्लवोत्सवम् ।
निगदस्व दयासिन्धो
मय × स्त्वनुग्रहः ॥

End :

तस्मात् सर्वप्रयत्नेन आचार्यं पूजयेद्धनैः ।
एवं यः कारयेद्भक्त्या श्रीपतेश्च प्लवोत्सवम् ॥

भुक्त्वेह विपुलान् भोगान् स्ववंश्यैरेकविंशकैः ।
पूर्वपश्चिमजैस्सार्धं प्राप्नोत्यन्ते हरेः पदम् ॥

× × × × × × × × ।
× × × × × × × × ॥

Colophon :

इति श्रीनारायणसंहितायां सरसि प्लवोत्सवविधानं नाम एकविंशोऽध्यायः ।

450

Sl. No. 46753 **फणिमालाः** Ms. No. P. 242/2-B

Beginning :

देवेशस्य रमापतेर्भगवतः सेवार्थमुद्योगिनां
आविर्भूतकलाविशेषविदुषां विष्णोः पदं भाविनाम् ।
स्थाननिवासिनां प्रति वचः कर्तुं समुत्साहिनां
आशीर्वाक्यमहं करोमि विदुषां स ब्रह्मघोषाह्वयम् ॥

End :

अनेन चैत्रोत्सवफणिमाला विज्ञापनेन भगवान् सर्वलोकशरण्यः सर्वात्मकः समस्तचिदचिद्वस्तुशेषीभूतसत्यकामसत्यसङ्कल्पसकलेतरविलक्षणसहस्रकालसाम्राज्यसन्तानप्रधानरसिकाश्रितवात्सल्यैकजलधिश्रीनृसिंहस्य सौलभ्यनायकीकान्तस्य सुप्रसन्नो वरदो भूत्वा ॥

Colophon :

+ + + + +

451

Sl.No. 46756 फलपूजाविधिः Ms. No. P. 5253/45

Beginning :

फलपुष्पादिकैः पूतैः तत्तत्काले समर्चयेत् ।
पौषे मासि च पुण्ये तु विदध्याच्च महोत्सवम् ॥

इति पारमेश्वरे महोत्सवाध्याये ॥

फलान्यपि समाहृत्य वन्यजानपदान्यपि ।
× × × × × × × ×॥

End :

ज्येष्ठे वा श्रावणे वापि देवाय विनिवेदयेत् ।
सर्वालङ्कारसंयुक्त विदध्याश्च महोत्सवम् ॥
एवं यः कारयेत् पूजां
श्रद्धापूतेन चेतसा ।
सर्वान् कामनिहावाप्य
विष्णुलोकं स गच्छति ॥

Colophon :

इति पाद्मे चतुर्दशाध्याये फलपूजाविधिः ।

452

Sl. No. 46757 फलपूजाविधिः Ms. No. P. 5253/46

Beginning :

फलपूजाविधिं वक्ष्ये फलाभ्युदयसाधनम् ।
फलं च त्रिविधं प्रोक्तं उत्तमादिविभेदतः ॥

त्रिफलं चोत्तमं विद्धि मध्यमं मण्डिमं भवेत् ।
अधमं वह्निकं चैव फलैस्सर्वैः समर्चयेत् ॥

End :

फलप्रदानं सर्वेषां फलदानं समाचरेत् ।
फलदानं वृद्धिकरं सस्यदानं च वर्धनम् ॥
तस्मात् सर्वप्रयत्नेन फलपूरमनुत्तमम् ।
फलपूरस्य दानेन भोगमोक्षप्रदं विभो ॥

Colophon :

इति अनन्तसंहितायां फलपूरणविधिः ।

453

Sl. No. 46769 **बालयौवनबुधमूर्तिलक्षणम्** Ms. No. P. 8298/20

Beginning :

बाले वा बाधितं त्रिम्बं आसने शयवानकम् ।
शयने वाधिकं चैव त्रिमूर्तिं त्रिविधा भवेत् ॥ १ ॥
× × × × × × × ।
ध्वजारोहन्तु कर्तव्यं तत्र दोषो न विद्यते ॥

End :

अङ्कुरार्पणपूर्वन्तु तत्र दोषो न विद्यते ।
चतुर्विधेन तत्पूर्वे अङ्कुरार्पणपानकम् ॥
त्रिविधं चोत्सवं पूर्वं सुलग्नेन समाचरेत् ।
निर्दोषलग्न × चैव त्रिविधं चोत्सवं तथा ॥

Colophon :

......

\+ \+ \+ \+ \+

454

Sl. No. 46772 **बिम्बनिर्णयः** Ms. No. P. 10281/69

Beginning :

मूरुयागवलिस्नानयात्राशयननिग्रहः ।
षड्विधं बिम्बमुद्दिष्टं पूर्णालयमिहोच्यते ॥
तिसृभिर्मध्यमं ज्ञेयं विम्बेकेनाधमं भवेत् ।
अभावे पादुका वापि सर्वकर्म समाचरेत् ॥

End

यात्रा बिम्बे कलाच्यंशं निवेश्य चतुरानन ।
शयने तत्कलामेकामावाह्य च क्रमादधः ॥
पूर्णालयमिति प्राहुराचार्यश्चतुरानन ।
नो तन्मध्यां ति प्राहुः प्राहुरार्याधमं तथा ॥

Colophon :

× × × × × ×

455

Sl. No. 46788 **बृन्दावनोत्सवः** Ms. No. P. 1669/93

Beginning :

वैखानसागमे भृगुः—
बृन्दावनप्रतिष्ठाया विधिं वक्ष्ये विशेषतः ॥
द्वादश्यां कार्तिके मासि सिते चाषाढमासके ॥

द्वादश्यामथवैशाखे ....

बृन्दावनं कारयित्वा शिलायां वाऽथ मृण्मये ॥

End :

दम्पती पूजनं चापि गोदानं तु सहस्रकम् ।

ब्राह्मणान् भोजयेत्पश्चात् भूरिदानं समाचरेत् ॥

Colophon :

इति वैखानसे भृगुप्रोक्ते बृन्दावनप्रतिष्ठाविधिः सम्पूर्णः ।

456

Sl. No. 46793 **ब्रह्मरात्रम्** **Ms. No. P· 5032/1**

Beginning :

+ + णं प्रोक्तं व्रतं चापि तथाविधम् ।

अत ऊर्ध्वं न वृद्धिः स्यात् तत्साराणां शतैरपि ॥

धर्मग्रन्थौ तथा वृद्धिर्द्विगुणद्विगुणं भवेत् ।

लेख्येन साधयेदर्थं साक्षिभिश्शपथेन च ॥

End :

ब्रह्मरात्रं मया प्रोक्तं एतत्सर्वं समासतः ।

एतद्यशस्य मायुष्यं स्वर्ग्यं धन्यं महाबलम् ॥

ब्रह्मणा कथितं पूर्वं श्रुत्वा नाराणात्प्रभो ।

तत्प्रसादेन वक्ष्यामि शिवरात्रमतः परम् ॥

Colophon :

इति ब्रह्मरात्रे पञ्चरात्रसारभूते मन्त्रकोशो नाम एकादशोध्यायः ब्रह्मरात्रं सम्पूर्णम् ।

Sl. No. 46797 **भक्तप्रतिष्ठाविधिः** Ms No. P. 5253/125

Beginning :

सनकः —

कुमुदाद्यप्रतीशानाः द्वारावरणवासिनाम् ।
शिलालोहादिभिः क्लृप्ता यथामूर्तिः प्रतिष्ठिता ॥
+ + + + + + + ।
+ + + + + + + + ॥
तत्र तत्र च किं कार्यं तदेतद्वद सङ्गमे ।
+ + + + + + + + ॥

शाण्डिल्यः —
द्वारावरणदेवानां स्वस्थितानां स्वसद्मसु ।
+ + + + + + + + ॥

End :

इति ते वैनतेयादि परिवारगणस्य च ।
पूजनं सर्वमाख्यातं नानासिद्धिफलप्रदम् ॥
गोपनीयं प्रयत्नेन
नास्तिकानां विशेषतः ।
प्रकाशयस्व भक्तानां
निष्कर्मनिरतात्मनाम् ॥

Colophon :

इति श्रीपारमेश्वरक्रियाकाण्डे भक्तप्रतिष्ठोत्सवविधिर्नाम अष्टादशोऽध्यायः ।

458

Sl. No. 46810 भक्तबिम्बाराधनविधिः Ms. No. P. 4978/40

Beginning :

श्रीयादीनां च देवीन मालायाश्रयवर्त्तिनाम् ।
विष्वक्सेनगरुत्मादीन् शठकोपादिकानपि ॥
कर्षणादिषु सर्वेषु दीक्षितैरेव कारयेत् ।
अदीक्षितनरो मोहात् भृत्यर्थं चार्चयेद्यदि ॥
× × × × × × × × ।
षण्मासात्पतितं याति सोऽक्षयं नरकं व्रजेत् ॥

End :

तद्ग्रामवासिनस्सर्वे महाव्याध्यादिपीडनम् ।
तत्स्थानं नाशये × × × राजा च सहसन्ततिः ॥
× × × × × × × ।
तस्मात्सर्वप्रयत्नेन दीक्षितैरेवमर्चयेत् ॥

Colophon :

इति श्रीपाञ्चरात्रे नलकूबरसंहितायां × × × द्यात्कययाश्रयबिम्बानां विष्वक्सेनादिशठकोपादिभक्तानां चाराधनाधिकारनिर्णयविधिः ।

459

Sl. No. 46821 भगवत्प्रतिष्ठाविधिः Ms. No. B. 794

Beginning :

अथ भगवत्प्रतिष्ठां व्याख्यास्यामः ।
तत्र बिम्बनिर्णयः—

सालग्रामशिलायां च कर्तव्यं विग्रहं हरेः ।
पुण्यक्षेत्रे शुभे क्षेत्रे पुण्यपर्वतमस्तके ॥ १ ॥
स्निग्धं रम्यं गृहीत्वाश्म कारयेच्छुभविग्रहम् ।
सर्वावयवसम्पूर्णं लक्षणैश्च विराजितम् ॥ २ ॥

End :

गोभूहिरण्यवस्त्राद्यैराचार्यं परितोषयेत् ।
महोत्सवं पञ्चदिनं यथाशक्त्यनुसारतः ॥
एवं प्रतिष्ठां कुर्वीत पञ्चरात्रोक्तमार्गतः ।
तत्र देवस्तु सान्निध्यं याति नारायणे हरिः ॥
प्रतिष्ठयासार्वभौमसद्मना भुवनत्रयम् ।
पूजादिना ब्रह्मलोकं त्रिभिर्मत्साम्यतामियात् ॥

Colophon :

इति श्रीपाञ्चरात्रे पाद्मसंहितोक्तभगवत्प्रतिष्ठापद्धतिः सम्पूर्णा ।

460

Sl. No. 46829 भगवदाराधनविधिः Ms. No. P. 7525/14

Beginning :

ओं माध्यन्दिनानन्तरं दक्षिणपादपूर्वकं देवालयं गत्वा ओं भू भूम्यै नमः इति भूमिं संस्पृश्य अस्त्रमंत्रेण आसनं निधाय प्रणम्य अञ्जलिं कृत्वा

End :

भगवन्तं पुनः पुनः दण्डवत् प्रणम्य अपराधान् क्षापयित्वा पुनः अर्घ्यादीन् समर्प्य पर्यङ्कासनं समर्प्य पादुकां समर्प्य भगवन्तं दिव्यपर्यङ्के श्रिया सह शाययेत् ॥

Colophon :

इति भगवदाराधनविधिः समाप्ता ।

461

Sl. No. 46837 भगवद्वंशजोत्पत्तिकथनम् **Ms. No. P. 5253/133**

Beginning :

सिद्धाश्रमे समासीनं वामनं ऋषिपुङ्गवम् ।
याज्ञवल्क्यो महातेजाः प्रणम्य तपसां निधिम् ॥
भवताऋषिशार्दूल धिष्णस्य नगरस्य च ।
मूर्तीनामवताराणां लक्षणं श्रुतवानहम् ।
× × × × × × × ।
× × × × × × × ॥

End :

इदं महोपनिषदं पञ्चरात्राख्यमुत्तमम् ।
रहस्यं परमं गोप्यं रक्षणीयं च सर्वदा ॥
विष्णुभक्ताय दान्तायाप्यनसूयापवादिने ।
आचार्यभक्तियुक्ताय कृतज्ञाय वदेत् सदा ॥
+ + + + + + + + ।
+ + + + + + + + ॥

Colophon :

इति श्रीपाञ्चरात्रमहोपनिषदि वामनसंहितायां पञ्चरात्रशास्त्रोत्पत्ति-
